# अथर्ववेदीयायां माण्डूकीशिक्षायां वर्णस्वरविमर्शः

यादवपुरविश्वविद्यालयस्थे संस्कृतविभागे सप्तदशाधिकद्विसहस्रतमाङ्गल-
वर्षादारभ्य एकोनविंशत्यधिकद्विसहस्रतमाङ्गलवर्षपर्यन्तं प्रचलिते
शिक्षावर्षे एम्. फिल् इत्युपाधिलाभाय प्रदत्तो गवेषणाप्रबन्धः


शोधप्रबन्धकर्ता

देवाशिष-पात्रः

Class Roll No.- 001701203002

Examination Roll No.- MPSA194002

Registration No. – 133332 of 2015-16

Year - 2017-2019

निर्देशकः

ड. अशोक-कुमार-माहातः

संस्कृतविभागाध्यापकः

यादवपुरविश्वविद्यालयस्य

संस्कृतः विभागः

यादवपुरविश्वविद्यालयः


२०१९

# अथर्ववेदीयायां माण्डूकीशिक्षायां वर्णस्वरविमर्शः

यादवपुरविश्वविद्यालयस्थे संस्कृतविभागे सप्तदशाधिकद्विसहस्रतमाङ्गल-
वर्षादारभ्य एकोनविंशत्यधिकद्विसहस्रतमाङ्गलवर्षपर्यन्तं प्रचलिते
शिक्षावर्षे एम्. फिल् इत्युपाधिलाभाय प्रदत्तो गवेषणाप्रबन्धः


शोधप्रबन्धकर्ता
देवाशिष-पात्रः
Class Roll No.- 001701203002
Examination Roll No.- MPSA194002
Registration No. – 133332 of 2015-16
Year - 2017-2019

निर्देशकः

ड. अशोक-कुमार-माहातः

संस्कृतविभागाध्यापकः

यादवपुरविश्वविद्यालयस्य



संस्कृतः विभागः

यादवपुरविश्वविद्यालयः

२०१९

## TO WHOM IT MAY CONCERN

This is to certify that the dissertation entitled "**अथर्ववेदीयायां माण्डूकीशिक्षायां वर्णस्वरविमर्शः**" submitted by Debasish Patra (Roll No. MPSA194002 of 2017-2019, Registration No. 133332 of 2015-2016) for M. Phil. Degree in Sanskrit, Jadavpur University, has been prepared under my supervision during the session 2017-2019. I consider it fit for the degree of Master of Philosophy (Arts) in Sanskrit of Jadavpur University.

Supervisor:

Date:

Head of the Department:

Date:

I do hereby declare that the dissertation entitled “अथर्ववेदीयायां माण्डूकीशिक्षायां वर्णस्वरविमर्शः” submitted by me for the award of Master of Philosophy in Arts at Jadavpur University is based upon my own work carried out under the supervision of Dr. Ashok Kumar Mahata and neither this dissertation nor any part of it has been submitted before for any degree or diploma anywhere / elsewhere.

Countersigned by the Supervisor                                Candidate

Date:                                                                        Date:

# कृतज्ञतासमर्पणम्

सर्वविद्याप्ररोहमूलं हि वेदः। वेदात् सर्वमेव प्रसिद्धति। युगान्तान्तर्हिताः वेदमन्त्राः ऋषिभिः ज्ञानचक्षुषा दृष्टाः स्वशिष्येभ्य उपदिष्टाश्च। तेऽव मन्त्राः श्रुतिपरम्परया अस्माकं समीपे उपनीताः। वेदानां निखिलज्ञानाधारत्वात्  अपौरुषेयत्वाच्च समेषां सविधे सा परमा वाक् यथार्थतया न प्रतिभाति। अयञ्च ऋषेः वृहस्पतेः एकस्मिन् मन्त्रे प्रतिपादितः **उतः त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्** इति (ऋक्संहिता १०/७१/४) । तस्मात् साधारणान् निकषा वेदार्थावबोधाय वेदाङ्गप्रवृत्तिः। षट्सु वेदाङ्गेषु अन्यतमायां शिक्षायां वर्णस्वरमात्राबलसामसन्तानानि षट् विषयाः प्रतिपादिताः।

वर्णात् शब्दप्रतिपत्तिः, शब्दात् पदसिद्धिः, पदात् वाक्यम्, पूर्णवाक्यश्रवणाच्चार्थप्रतिप्रत्तिर्जायते। जनाः वाक्येनैव सुष्ठुतया भावं प्रकाशयितुं समर्थाः भवन्ति। अतो भावप्रकाशस्य तथा लोकव्यवहारस्य मूलं हि वर्णः, वर्णं विना शब्दाप्रतिपत्तेः। वर्णोच्चारणादिविषये यथार्थज्ञानलाभाय मया शोधकार्ये माण्डूकीशिक्षा गृहीता। विषयबाहुल्यात् समयाभावाच्च मया केवलं वर्णस्वरौ एवाधारीकृत्य **अथर्ववेदीयायां माण्डूकीशिक्षायां वर्णस्वरविमर्शः** इति शोधप्रबन्धः प्रस्तुतः। अस्मिन् कार्ये परामर्शदान-विषयविवेचन-पुस्तकान्वेषण-लेखनादिसर्वेषु कर्मसु मम तत्त्वावधायकाः **ड. अशोक-कुमार-माहातमहाभागाः** सर्वदैव मां सहायतां कृतवन्तः। तत्सहायतां विना ममायं प्रबन्धः समाप्तिं गन्तुं नार्हति। अतः प्रथममेव मम तत्त्वावधायकेभ्योऽहं कृतज्ञतां व्याहरामि। एतद्विहाय मम विभागस्य अन्ये अध्यापकाः अध्यापिकाश्च विविधोपायेन मां सहायतां कृतवन्तः। तेभ्योऽहं कृतज्ञतां ज्ञापयामि। पुस्तकप्रदानेन मां ये उपकृतवन्तः तेभ्यः विभागीयग्रन्थागारिकेभ्यः, प्रशासनिककर्मसु साहाय्यार्थं विश्वविद्यालयस्य अपरेभ्यः आधिकारिकेभ्यः कृतज्ञतां ज्ञापयामि। मुद्रणादिकर्मसु साहाय्यार्थं मन्मित्रेभ्यः कृतज्ञतां ज्ञापयामि। अन्तिमे सर्वविधोपायेन मां साहाय्यार्थं मम परिवारेभ्यः अहं कृतज्ञतां व्याहरामि।

विनीतः

देवाशिष-पात्रः

# सूचीपत्रम्


| **विषयः** | **पत्राङ्कः** |
|---|---|
| उपोद्घातः | 1 - 5 |
| प्रथमोऽध्यायः (वेदाङ्गपरिचयः शिक्षापरिचयश्च) | 6 - 27 |
| द्वितीयोऽध्यायः(माण्डूकीशिक्षानुमतः स्वरवर्णविमर्शः) | 28 - 41 |
| तृतीयोऽध्यायः(माण्डूकीशिक्षानुमतो व्यञ्जनवर्णविमर्शः) | 42 - 57 |
| चतुर्थोऽध्यायः(माण्डूकीशिक्षानुमत उदात्तादिस्वरविमर्शः) | 58 - 85 |
| उपसंहारः | 86 - 92 |
| सहायकग्रन्थाः | 93 - 94 |

# अथर्ववेदीयायां माण्डूकीशिक्षायां वर्णस्वरविमर्शः

## उपोद्घातः

इह जगति निरन्तरं निरतिशयं सुखमन्विष्यमाणानां मानवानामभ्युदयनिःश्रेयससिद्धिहेतुकस्य धर्मस्य तथा परमपुरुषार्थस्य साधनभूतः इहामुत्रमङ्गलसम्पादयिता वेद एव शाश्वतः पन्था इति कोऽपि विद्वान् न विवदते। भूतभव्यभविष्यतां समग्रस्य वस्तुजातस्य प्रसिद्धिस्थानं तथा सर्वविद्याप्ररोहमूलं हि वेदः। वेद एव अस्मान् धर्मार्थकाममोक्षेषु परमार्थभूतां मोक्षपदवीमुपदिशति । तस्माद् भगवता मनुनापि उच्यते –

**बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्।**

**तस्मादेतद् परं मन्ये यज्जन्तोरस्य साधनम्।।** इति।[1]

अपि चोच्यते- **वेदोऽखिलो धर्ममूलम्।** इति।[2]

वेदात् सर्वमेव सिध्यति। किञ्च वेद एव निखिलमानवसमाजस्य प्राचीनतमज्ञानराशिः इति स्वीक्रियते।

वेदः चतुर्बिधः- *ऋग्वेदः सामवेदः यजुर्वेदः अथर्ववेदश्च। ऋग्वेदो* दशमण्डलात्मको दशतयीति नाम्ना व्यपदिश्यते। ऋग्वेदस्य मण्डलक्रमेण अष्टकक्रमेण च विभागो दृश्यते। तत्र मण्डलक्रमेण दश मण्डलानि, पञ्चाशीतिः अनुवाकाः, अष्टाविंशत्यधिकैकसहस्रं सूक्तानि च सन्ति। अष्टकक्रमेण अष्टौ अष्टकाः, चतुष्षष्ठिः अध्यायाः, षडधिकद्विसहस्रं वर्गाः, प्रायेण चतुश्शताधिकदशसहस्रं मन्त्राः सन्ति। गीत्यात्मको हि *सामवेदः।* सामवेदे ऋग्वेदस्य मन्त्रा एव

---

1 मनुसंहिता 12/99

2 मनुसंहिता 2/6

आधिक्येन उपलभ्यन्ते। ऋग्वेदगता मन्त्रा एव उदगात्रा षड्जादिस्वरयोगेन पठ्यन्ते। **गीतिषु सामाख्या**[3] इत्युक्तं भगवता जैमिनिना। पञ्चसप्ततिः स्वतन्त्राः मन्त्राः सामवेदे सन्ति। शुक्लकृष्णभेदेन यजुर्वेदो द्विधा विभज्यते। तत्र *शुक्लयजुर्वेदः* वाजसनेयीसंहिता नाम्ना *कृष्णयजुर्वेदः* तैत्तिरीयसंहिता नाम्ना व्यपदिश्यते। चतुर्थो वेदो हि अथर्ववेदः। वेदोऽयमर्वाचीनवेदरूपेण परिचितः वैदिकवाङ्मये सुप्रसिद्धश्च। किञ्च न्यायाचार्येण जयन्तभट्टेन चतुर्षु वेदेषु अथर्ववेदः प्रथम इति उक्तम् - **तत्र वेदाश्चत्वारः। प्रथमोऽथर्ववेदः**[4] इति। अथर्ववेदे एव राष्ट्रशासनादीनाम् अर्वाचीनविषयानामुल्लेखः प्राप्यते। अथर्ववेदस्य ब्रह्मवेदः अङ्गिरवेदः अथर्वाङ्गिरसः इत्येतानि नामान्तरानि सन्ति। वेदस्यास्य विंशतिः काण्डानि सन्ति। महाभाष्यमतानुसारेण वेदस्यास्य नवसंख्यकाः शाखाः आसन्- पैप्पलादः, शौनकीयः, स्तौदः, मौदः, जाजलः, जलदः, ब्रह्मवेदः, देवदर्शः, चारणवैद्यारण्यश्च – **नवधाऽथर्वाणः**[5] इति। परन्त्वधुना अथर्ववेदस्य सायणभाष्यसमन्वितं शाखाद्वयमुपलभ्यते- पैप्पलादशाखा शौनकीयशाखा च । प्रचलिता अथर्ववेदसंहिता शौनकशाखान्तर्गता। अथर्ववेदसाहित्यान्तरे उपलभ्यमानं गोपथब्राह्मणम्, वैतानश्रौतसूत्रम्, कौशिकगृह्यसूत्रम्, पठीनसीधर्मसूत्रम्, उपनिषत्सु च पुनः प्रश्न-मुण्डक-माण्डुक्याख्याः तिस्रः उपनिषदः। तत्र प्रश्नोपनिषद् पैप्पलादशाखासम्वन्धिनी, मुण्डक-माण्डुक्ये च पुनः शौनकशाखान्तर्गते। वेदस्यास्य सप्तशतोत्तरैकत्रिंशत्सूक्तमध्ये चतुश्चत्वारिंशदुत्तरशतमितानि सूक्तानि आयुर्विज्ञानं निरूपयन्ति, द्विशतोत्तरचतुश्चत्वारिंशत् सूक्तानि राजधर्ममुपदिशन्ति। पञ्चसप्ततिः सूक्तानि च समाजव्यवस्थां निर्दिशन्ति। षडशीतिः सूक्तानि च अध्यात्मविद्यात्मकानि। अवशिष्टानि

---

[3] जैमिनिसूत्रम् 2/1/35

[4] न्यायमञ्जरी 236

[5] महाभाष्यम् पस्पशाह्निकम्

सूक्तानि विविधविषयप्रतिपादकानि। वेदेऽस्मिन् विविधाः अर्वाचीनविषयाः निगदिताः। आयुर्वेदस्य विबिधं वर्णनमत्रोपलभ्यन्ते।

अथर्ववेदस्य वेदत्वविषये विद्वत्सु मतभेदो वर्तते। केषाञ्चिन्मतानुसारं - **तेषामृक् यत्रार्थवशेन पादव्यवस्था , गीतिषु सामाख्या, शेषे यजुश्शब्दः**[6] इति जैमिनिकृतलक्षणानुसारं त्रयीति नाम्ना ऋक्-साम-यजुषां ग्रहणात् अथर्ववेदस्य वेदत्वं नास्ति। परन्त्वत्र उच्यते यत् त्रयीत्यनेन त्रिबिधो मन्त्रः बोध्यः, न तु वेदत्रयम्। जैमिनिकृतलक्षणे त्रिबिधानां मन्त्राणां स्वरूपमुच्यते न तु वेदानामिति। अपि च कैश्चिदुच्यते यद् अथर्ववेदस्य यज्ञेन सह सम्बन्धो नास्ति। तान् प्रति एवमुच्यते यद् ऋक्-साम-यजुषां मन्त्रैः यज्ञः सम्पाद्यते तथापि ब्रह्मकर्मसम्पादनार्थम् अथर्ववेदः अपेक्ष्यते। अतः अथर्ववेदस्यापि वेदत्वमस्तीति बहुभिः पण्डितैः स्वीक्रियते। वेदे एव अथर्ववेदस्य वेदत्वमङ्गीकृतम्। छान्दग्योपनिषदि सनत्कुमारं प्रति नारदवाक्यं यथा- **ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्**[7] इति। मुण्डकोपनिषद्यपि एवमाम्नायते - **ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः**[8] इति । एवमन्यत्रापि दृश्यते।

ऋगादयः चत्वारो एव वेदाः संहिताब्राह्मणारण्यकोपनिषद्भेदेन चतुर्धा विभक्ताः। संहितांशे मन्त्राणां संकलनं विद्यते। ब्राह्मनांशे मन्त्राणां व्याख्यानविनियोगादिविषयाः आलोचिताः। आरण्यकांशे कर्मयज्ञस्य उपनिषदि ज्ञानयज्ञस्य च विवरणमुपलभ्यते। यद्यपि ऋषीणां सकाशे मन्त्रार्थः स्फुट एवासीत् परन्तु परवर्तिनि काले पुरुषविद्यानित्यत्वात् सर्वेषां कृते वेदार्थप्रकाशनाय वेदाङ्गानि प्रवृत्तानि ततश्च वेदव्याख्यानरीतिः प्रारब्धा। यद्यपि वेदाङ्गेषु एव प्रथमं वेदव्याख्यानमुपलभ्यते। निरुक्तवृत्तिकृता दुर्गाचार्येण उच्यते – **अथ किमर्थं वेदो वेदाङ्गानि च प्रवृत्तानि।**

---

[6] जैमिनिसूत्रम् 2/1/35

[7] छान्दग्योपनिषद् 7/1/2

[8] मुण्डकोपनिषद् 1/1/5

**सर्वकामप्राप्त्यादिर्मोक्षान्तः पुरुषार्थो वक्तव्य इति वेदः प्रवृत्तः। तत्परिज्ञानाय वेदाङ्गानि प्रवृत्तानि।[9] इति।** तानि च वेदाङ्गानि शिक्षाकल्पव्याकरणनिरुक्तछन्दःज्योतिषानि षट्।

**मम शोधविषयः**

यद्यपि अपरेषां वेदानां शिक्षाग्रन्थाधिक्यं वर्तते परन्तु अथर्ववेदस्य उपलभ्यमाना शिक्षा हि केवलं माण्डुकी शिक्षा। अस्यां शिक्षायाम् एकाशीत्यधिकशतसंख्यकाः श्लोकाः सन्ति। अथर्ववेदस्य सम्यगुच्चारणपद्धत्यादिविषये सुष्ठु ज्ञानलाभाय अस्याः शिक्षायाः महत्त्वमपरिहार्यम्। न केवलं वर्णोच्चारणादिविषयाः अपि च वृत्त्यादिविषयेऽपि तत्र बहु आलोचितम्। परन्तु माण्डूकीशिक्षायाः व्याख्यानात्मकः ग्रन्थो नोपलभ्यते। तस्मात् तैत्तिरीयोपनिषदि शिक्षायाः वर्णः स्वरः मात्रा बलं साम सन्तानम् इति ये विषया आम्नाताः तेषु वर्णस्वरौ माण्डूकीशिक्षायां कथं प्रतिपादितौ इत्यहं प्रतिपादनेप्सुः। अपि च अस्याः शिक्षायाः वर्णस्वरसमीक्षणकाले अपरैः शिक्षाग्रन्थैः सह मतसादृश्यं मतवैविध्यमपि प्रतिपादयितुकामोऽहम्। न केवलं शिक्षाग्रन्थाः अपि तु बहुत्र प्रातिशाख्यान्यपि मया गृह्यन्ते। शिक्षायाः वर्णस्वरौ एवास्य शोधप्रबन्धस्य विषयः। विषयेऽस्मिन् जिज्ञासुः अस्याधिकारी। सम्बन्धश्च प्रतिपाद्यप्रतिपादकभावः। प्रतिपाद्यौ माण्डूकीशिक्षायाः वर्णस्वरौ प्रतिपादकश्च अयं शोधप्रबन्धः। अथर्ववेदस्यान्तःपातित्वात् अथर्ववेदस्य वर्णोच्चारणस्वराद्युच्चारणादिज्ञानमस्य शोधप्रबन्धस्य प्रयोजनम्। वर्णात् शब्दप्रतिपत्तिः, शब्दात् पदसिद्धिः, पदाद् वाक्यम्, पूर्णवाक्यश्रवणाच्च अर्थप्रतिपत्तिर्जायते। जनाः वाक्येन सुष्ठुतया भावं प्रकाशयितुं समर्थाः भवन्ति। अतः भावप्रकाशस्य तथा लोकव्यवहारस्य मूलं हि वर्णाः, वर्णाद् विना शब्दाप्रतिपत्तेः। अतो मया शोधकार्ये वर्णालोचनं प्रथमं गृहीतं ततश्च स्वरः। मया शोधप्रबन्धः चतुर्षु अध्यायेषु विभज्यते। प्रथमः अध्यायः - वेदाङ्गपरिचयः तथा

[9] निरुक्तस्य दुर्गवृत्तिः 1/1

शिक्षापरिचयः, द्वितीयः अध्यायः -माण्डूकीशिक्षानुमतः स्वरवर्णविमर्शः, तृतीयः अध्यायः - माण्डूकीशिक्षानुमतः व्यञ्जनवर्णविमर्शः, चतुर्थः अध्यायः - माण्डूकीशिक्षानुमतः उदात्तादिस्वरविमर्शः।

# प्रथमः अध्यायः

## वेदाङ्गपरिचयः शिक्षापरिचयश्च

*अथर्ववेदीयायां माण्डूकीशिक्षायां* वर्णस्वरविमर्शः इत्याख्यस्य शोधप्रबन्धस्य अस्मिन् प्रथमे अध्याये मया समासेन षण्णां वेदाङ्गानां परिचयः, समुपलब्धानां शिक्षाग्रन्थानां परिचयः, प्रातिशाख्यानां शिक्षान्तःपातित्वम्, *माण्डूकीशिक्षायाः* परिचयः, *माण्डूकीशिक्षायाः* उपलब्धं पुस्तकमित्यादयो विषयाः प्रतिपादिताः।

## वेदाङ्गोद्भवः

वेदमन्त्राः ऋषिभिः स्वानुभूत्या दृष्टाः न तु विरचिताः

**युगान्तेऽर्हितान् वेदान सेतिहासान् महर्षयः।**

**लेभिरे तपसापूर्वमनुज्ञातः स्वयम्भूवा॥** इति।[10]

महाभारतवचनानुसारं **न कश्चिद् वेदकर्तास्ति वेदस्मर्ता चतुर्मुखः** [11]इति। **ऋषयस्तु मन्त्रद्रष्टारो न मन्त्रकर्तारः** इत्यादिवचनानुसारं च वेदमन्त्राणां वाल्मीकिकालिदासादिवत् कर्तृत्वं नास्तीति सिद्धम्। तस्माद् ऋषिभिराम्नातत्वात् निखिलज्ञानाधारत्वाच्च वेदमन्त्राणां दुरवगाह्यत्वं विदितमेव विद्वत्समाजे। अपि च इमे वेदमन्त्रा प्रगूढाभिप्रायाः अनेकविधतात्पर्यविशिष्टाः बहुकोटिकाश्च। **स्वाध्यायोऽध्येतव्यः** इति विध्यनुसारं **ब्राह्मणेन निष्कारणो धर्मः षडङ्गवेदोऽध्येयो ज्ञेयश्च** इति[12] महाभाष्यवचनानुसारं वेदाध्ययनं तथा वेदार्थज्ञानं ब्राह्मणानां तथा सर्बेषां मानवानां परमं

---

[10] महाभारतस्य शान्तिपर्व 210/19

[11] पराशरसंहिता 1/20

[12] महाभाष्यम् 1/9

प्रयोजनम्। तस्मादेव सर्वेषां कृते वेदार्थप्रकाशनाय प्राचीनकालत एव वेदस्य व्याख्यानधारा प्रारब्धा या तु अधुनापि प्रचलिता एव। स्कन्दस्वामिवेङ्कटमाधवसायणाचार्यादयः प्राचीनपण्डिताः दयानन्दारविन्दादयः अर्वाचीनाः प्राच्यपण्डिताः तथा म्याक्स्मुलारादयः पाश्चात्त्यविद्वांसः अपि वेदव्याख्यानं कृतवन्तः।

ऋषीणां हृदि उद्भासितानां मन्त्राणां व्याख्यानप्रचेष्टा प्रथमं ब्राह्मणसाहित्ये उपलभ्यते परन्तु तत्र अर्थवादाख्यानादीनां प्राचुर्य्यात् वेदपरवर्तिनि काले वेदार्थाववोधाय वेदाङ्गानामुद्भवः। प्रधानस्य अङ्गिनः वा यत् उपकारकं तदङ्गम्। यथा कोऽपि प्राणी स्वकीयैरङ्गैः कस्मिन्नपि कर्मणि यथार्थतया प्रवर्तितुं समर्थो भवति तद्वत् वेदाङ्गान्यपि वेदस्य यथार्थावबोधं कारयन्ति। वेदाङ्गसमूहोऽयं न केवलं वेदानाम् अङ्गभूतत्वात् वेदाङ्गसमाख्यां भजते अपि तु वेदाभिप्रायप्रकाशनक्षमत्वात् एव तेषां वेदाङ्गसंज्ञा। वेदाः अङ्ग्यन्ते विशदीक्रियन्ते प्रकाश्यन्ते वा एभिरिति वेदाङ्गानि। वेदस्य संहिताब्राह्मणारण्यकोपनिषदां यथार्थः पाठः अर्थबोधः क्रियासु मन्त्राणां विनियोगः एतत् सर्वमेव एभिः अङ्गैः सम्पाद्यते।

वेदाङ्गानां महत्त्वं अपरिहार्यत्वं च सूचयती *मुण्डकोपनिषद्* वेदैः सह एव अपराविद्यारूपेण वेदाङ्गानि उल्लिलेख –

**तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः।**

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषम्।** इति।[13]

षण्णां वेदाङ्गानां वेदस्य अङ्गत्वेन प्रकृष्टं वर्णनं *पाणिनीयशिक्षायामु*पलभ्यते –

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

---
[13] मुण्डकोपनिषद् 1/1/5

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥** इति।[14]

शिक्षा कल्पो व्याकरणम् निरूक्तम् छन्दो ज्योतिषम् इति वेदाङ्गानि षट्।

शिक्ष्यते वर्णस्वराद्युच्चारणविधिरुपदिश्यते यया सा शिक्षा। तथा च तैत्तिरीयाः समामनन्ति उपनिषदारम्भे – **ओं शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा वलम्। साम सन्तानः।** इति। तत्र वर्णो अकारादिः, स्वरा उदात्तादिः, मात्रा ह्रस्वादिः, बलं स्थानप्रयत्नौ, साम निषादादिः, सन्तानो विकर्षणादिः । एषामवबोधनमेव शिक्षायाः प्रयोजनम्।

द्वितीयं वेदाङ्गं हि कल्पः। कल्प्यते समर्थ्यते यज्ञयागादिप्रयोगाः यत्र स कल्पः। अर्थात् कर्मकाण्डविधिप्रतिपादका ग्रन्थाः कल्पसूत्रमिति पदेन व्यपदिश्यन्ते। कल्पसूत्रमिति श्रौत-गृह्य-धर्मसूत्राणां पारिभाषिकी संज्ञा। तत्र श्रुतिप्रतिपादितयज्ञादिविधानतद्विवरणप्रतिपादकाः ग्रन्थाः श्रुतिमूलकत्वात् श्रौतसूत्राणीति परिभाष्यन्ते। गृहस्थाश्रमिणां जन्मप्रभृतिमृत्युपर्यन्ताः संस्कारादयः कर्तव्यविशेषाः येषु विव्रियन्ते तानि गृह्यसूत्राणि। येषु पुनः पारमार्थिकाः सामाजिकाः राजनीतिविषयकाश्च धर्मविशेषा उपदिश्यन्ते तानि धर्मसूत्राणि।

तृतीयं वेदाङ्गं हि व्याकरणम्। व्याकरणस्य महत्वं स्वीकृत्य वेदपुरुषस्य मुखत्वेन अङ्गीकृतं व्याकरणम्। साधुशब्दज्ञानं हि व्याकरणस्य साक्षात् प्रयोजनम्। महाभाष्यकृता पतञ्जलिना व्याकरणस्य पञ्च मुख्यप्रयोजनानि त्रयोदश गौणप्रयोजनानि च उक्तानि। उक्तञ्च तेन

[14] पाणिनीयशिक्षा 41-42

– **रक्षोहागमलघ्वसन्देहाः प्रयोजनानि।**[15] इति। प्रचलितेषु व्याकरणसम्प्रदायेषु पाणिनीयव्याकरणं हि मुख्यं सर्वोत्कृष्टञ्च। अस्य सम्प्रदायस्य प्रवक्ता हि भगवान् पाणिनिः। पाणिनीयव्याकरणे एव वैदिकानां तथा लौकिकानां सर्वेषामेव शब्दानां साधुत्वरक्षणं परिलक्ष्यते। तस्मादेव संस्कृतवाङमये अस्य व्याकरणस्य सर्वाधिकं प्रचलनं दृश्यते। पाणिनीयव्याकरणं त्रिमुनिव्याकरणमिति उच्यते। त्रिमुनि हि सूत्रकारः पाणिनिः, वार्तिककारः कात्यायनः, भाष्यकारः पतञ्जलिः। पाणिनिः प्रायेण चतुःसहस्रसूत्रात्मकम् *अष्टाध्यायीति* सूत्रग्रन्थं विरचितवान्। तत्र कात्यायनेन वार्तिकमुपन्यस्तम्। वार्तिकोपरि पतञ्जलिना *महाभाष्यं* विरचितम्। यत्र त्रयाणां मुनीनां विरोधः दृश्यते तत्र उत्तरवर्तिनः मुनेः प्रामाण्यं स्वीक्रियते यथोत्तरं मुनीनां प्रामाण्यमिति न्यायात्।

*निरुक्तं* हि चतुर्थं वेदाङ्गम्। *निरुक्तं* नाम पदविभागमन्त्रार्थदेवतानिरुपकं शास्त्रम्। निरुच्यते निःशेषेण उपदिश्यते निर्वचनविधिना तत्तदर्थावबोधनाय पदजातं येन यत्र वा तन्निरुक्तम्। निरुक्तलक्षमप्रसङ्गे सायणाचार्येण उक्तम्- **अर्थाववोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्।**[16] इति। निघन्टूवाय्स्य वैदिककोषस्य व्याख्यानं हि यास्काचार्यविरचितं *निरुक्तम्*। निरुक्ते त्रीणि काण्डानि द्वादश अध्यायाश्च सन्ति। प्रथमतः तृतीयाध्यायपर्यन्तं नैघन्टुककाण्डम्, चतुर्थाध्यायात् षष्ठाध्यायपर्यन्तं नैगमकाण्डम्, सप्तमाध्यायात् द्वादशाध्यायपर्यन्तं दैवतकाण्डम्। उक्तञ्च अनुक्रमणिकाभाष्ये –

**आद्यं नैघन्टुकं काण्डं द्वितीयं नैगमं तथा।**

**तृतीयं दैवतञ्च समाम्नायस्त्रिधा स्थितः॥**[17] इति।

---

[15] महाभाष्यम् 1/5

[16] ऋग्वेदभाष्यभूमिकायां वेदस्य षडङ्गसमुद्देशप्रसङ्गः

[17] अनुक्रमणिकाभाष्यम्

गवादिर्देवपत्न्यन्तशब्दाः निरुक्ते आलोचिताः। निरुक्तकारयास्काचार्येण शाकटायनादिपूर्ववर्तिनः निरुक्तकाराः उल्लिखिताः। यास्काचार्येण नामाख्यातोपसर्गनिपाताः चत्वारि पदजातानि उक्तानि। तेनोच्यते- **तद् यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति।**[18] इति।

छन्दो हि पञ्चमं वेदाङ्गम्। वेदाङ्गमिदं वेदपुरुषस्य पादत्वेन अङ्गीकृतम्। यथा वेदवाणी आधिक्येन पद्यात्मिका तथा लौकिककाव्यानि अपि। छन्दश्शास्त्रं हि अखिलकाव्यप्रपञ्चस्य प्रसवभूमिः। ऋषीणां हृदि उद्भासिताः वेदमन्त्राः छन्दोमयीवाणीरूपेण निसृताः। छन्द एव शब्दान् सूत्रवत् वध्नाति। **छदि संवरणे** इति धातोः **छद अपवारणे** इति धातोः वा छन्दःशब्दस्योत्पत्तिः। यास्काचार्येण निरूक्तग्रन्थे छन्दःशब्दस्य निर्वचनप्रसङ्गे उक्तम्- **छन्दांसि छादनात्**[19] इति। वैदिकछन्दांसि अक्षरपरिमितानि भवन्ति। तस्मादुच्यते- **यदक्षरपरिमाणं तच्छन्दः**[20] इति। अत्र अक्षरपदेन केवलं स्वरस्यैव ग्रहणं सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम् इत्यादिभाष्यवचनात्। वैदिकछन्दांसि प्राधान्येन सप्त। तानि यथा गायत्री, उष्णिक्, अनुष्टुप्, वृहती, पङ्क्ति, त्रिष्टुप्, जगती च। एतानि छन्दांसि चतुस्संख्याभिः उत्तरोत्तरम् एधमाना। इदञ्च आम्नातम् अथर्ववेदसंहितायाम् – **सप्त छन्दांसि चतुरुराण्यन्यो अन्यस्मिन्नध्यर्पितानि।**[21] इति। सम्प्रति उपलभ्यमानेषु छन्दोग्रन्थेषु पिङ्गलाचार्यकृतं छन्दःसूत्रमेव प्राचीनतमं वेदाङ्गत्वेन स्वीकृतञ्च। न केवलमत्र वैदिकछन्दसामेव विवरणमपि तु लौकिकछन्दसामपि विशदुपदेशोऽत्र उपलभ्यते। पिङ्गलसूत्रमिदम् अष्टभिरध्यायैः उपनिबद्धम्। अन्ये अपि बहवः छन्दोग्रन्थाः उपलभ्यन्ते। केदारभट्टस्य *वृत्तरत्नाकरः*, क्षेमेन्द्रस्य *सुवृत्ततिलकः*,

---

[18] निरुक्तम् 1/5

[19] निरुक्तम् 7/12

[20] कात्यायनसर्वानुक्रमणी 2/6

[21] अथर्ववेदसंहिता (शौनकीया) 8/9/19

हेमचन्द्रस्य *छन्दोऽनुशासनम्* इत्यादयः। विद्वद्वरेण गङ्गादासेन *छन्दोमञ्जरी*नाम्ना एकोऽपरोऽपि ग्रन्थः विद्वद्भिः समादृतो भवति। ग्रन्थेऽस्मिन् षट् स्तवकाः सन्ति।

षष्ठः वेदाङ्गो हि ज्योतिषम्। वेदपुरुषस्य नेत्रत्वेन अङ्गीकृतं वेदाङ्गमिदं कालविज्ञापकं शास्त्रम्। उक्तञ्च आर्यज्योतिषाख्ये ग्रन्थे –

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।**

**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्।।** इति।

सुमुहूर्तमनुरुध्य क्रियमाणाः वेदप्रतिपादिताः यज्ञादिक्रियाविशेषाः फलाय कल्पन्ते न तु यदृच्छया सम्पाद्यमानाः। तन्मुहूर्तज्ञानञ्च ज्योतिषं विना न सम्भवति। तस्मादेव ज्योतिषस्य वेदाङ्गत्वम् अङ्गीकृतम् ऋषिभिः। चतुर्णां वेदानां भिन्नं ज्योतिषशास्त्रमुपलभ्यते। *ऋग्वेदस्य* ज्योतिषशास्त्रम् ऋग्ज्योतिषम्, *यजुर्वेदस्य* याजुष्ज्योतिषम्, *अथर्ववेदस्य* अथर्वज्योतिषम्। *सामवेदस्य* ज्योतिष्शास्त्रं नोपलभ्यते। अमावस्यातिथौ पूर्णिमातिथौ च दर्शपूर्णमासयागः क्रियते। वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः इत्यादिश्रुतिवचनानुसारम् एकैकस्य आधानं भिन्नकालिकं निर्दिष्टम्। अतः वेदप्रतिपादितयज्ञानुष्ठानाय ऋतुतिथ्यादीनां ज्ञानार्थं ज्योतिषज्ञानम् आवश्यकम्। वेदपरवर्तिनि काले बहवः लब्धकीर्तयः ज्योतिषाचार्याः आविर्भूताः सन्ति। तेषु केचित् यथा *वृहज्जातक-वृहत्संहिता*दिग्रन्थानां प्रणेता वराहमिहिरः, *आर्यसिद्धान्त*प्रणेतृ आर्यभट्टः, *ब्रह्मस्फूटसिद्धान्त*प्रणेतृ ब्रह्मगुप्तः, सिद्धान्तशिरोमणिकर्ता भास्कराचार्यः।

## वेदाङ्गेषु शिक्षा

षट्सु वेदाङ्गेषु शिक्षा हि अन्यतमा। ननु का नाम शिक्षेति जिज्ञासायां वैयाकरणैः शिक्षाशब्दस्य व्युत्पत्तिद्वयं प्रदर्शितम्। प्रथमं तत्र शिक्ष्-विद्योपादाने इति धातोः शिक्षयति या सा शिक्षा इत्यस्मिन्नर्थे शिक्षाशब्दो निष्पाद्यते। अत्र किं शिक्षयति इति जिज्ञासायां रूढ्या वर्णोच्चारणमध्याह्रियते। शिक्ष्यन्ते वेदनीयत्वेन उपदिश्यन्ते वर्णोच्चारमधर्मादयो हस्तस्वरादयश्च यत्र सा शिक्षेति तात्पर्यार्थः। द्वितीयं शक्लृ-शक्तौ इति धातोः शिक्षाशब्दो निष्पन्नः। शक्तुमिच्छा शिक्षा। शक्तुमिच्छा नाम सामर्थ्यम्। सामर्थ्यं नाम वर्णोच्चारणशक्तिः। अर्थात् वर्णोच्चारणप्रतिपादकः ग्रन्थः शिक्षाग्रन्थः इति सरलार्थः। चतुर्वेदभाष्यकृता सायणाचार्येण ऋग्वेदभाष्यभूमिकाग्रन्थे वेदाङ्गोपयोगितालोचनाप्रसंगे शिक्षालक्षमुक्तम्- **वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा।** इति।[22] शौनकाचार्येण ऋग्वेदप्रातिशाख्ये शिक्षाविषये उक्तम्- **शिक्षा वर्णशिक्षा** इति।[23] भगवता शंकराचार्येण तैत्तिरीयोपनिषदः भाष्ये शिक्षावल्ल्यामुच्यते – **शिक्षा शिक्ष्यतेऽनयेति वर्णाद्युच्चारणलक्षणम् शिक्ष्यन्त इति वा शिक्षा वर्णादयः।** इति।[24]

**दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।** इति।[25]

---

[22] ऋग्वेदभाष्यभूमिका वेदस्य षडङ्गसमुद्देशप्रसङ्गः

[23] ऋग्वेदप्रातिशाख्यम् 14/68

[24] तैत्तिरीयोपनिषद् 1/2/1 भाष्यम्

[25] महाभाष्यम् 1/14

महाभाष्यवचनानुसारं वर्णानां स्वराणां वा ये दोषाः निर्दिष्टाः तेभ्यो दोषेभ्यो वैदिकं वाङ्मयं शिक्षाशास्त्राण्येव त्रायन्ते। वैदिकपरम्पराणां यदुचछारणं हस्तादिसञ्चालमद्यावधि संरक्षितं तद् शिक्षाग्रन्थैरेव सम्पादितम्

## शिक्षाङ्गोपयोगः

शब्दार्थयोर्मध्ये शब्दो हि प्रथमः। शब्दगतवर्णानामुच्चारणात् श्रवणाद् वा अनन्तरं तत्स्वरूपविज्ञानेनैव अर्थप्रतिपत्तिर्जायते। अतः शब्दार्थज्ञाने प्रथमं हि वर्णोच्चारणम्। समग्रं वैदिकवाङमयं तथा संस्कृतवाङ्मयं हि शब्दस्वरूपमेव। यदि अस्य शब्दराशेरुच्चारणं सम्यक्तया न ज्ञायते तर्हि न कोऽपि विद्वान् मन्त्राणाम् अर्थं तात्पर्यञ्च यथार्थतया अवगन्तुं समर्थो भवति। यद्यपि सर्वाण्यपि वेदाङ्गानि वेदार्थाववोधाय एव प्रवृत्तानि तथापि शब्दार्थज्ञाने वर्णोच्चारणस्य प्राथम्यात् सर्वप्रथममेव शिक्षाशास्त्रस्याध्ययनं कर्तव्यम्। शिक्षाङ्गस्य प्राथम्ये ऋषिवचनमपि अत्र प्रमाणम्। यतः **शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषम्** इति[26] मुण्डकोपनिषद्वचने , **शिक्षा घ्राणन्तु वेदस्य हस्तौ कल्पोऽथ पठ्यते...** इति[27] पाणिनीयशिक्षावचनादिषु च ऋषिभिः षट्सु अङ्गेषु शिक्षायाः उल्लेखः प्राथम्येन कृतः।

भगवता पतञ्जलिना स्वकीये महाभाष्यग्रन्थे उच्यते यत् **एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति**। इति[28]। अर्थात् एकस्यापि शब्दस्य यथार्थज्ञानं सर्वं काम्यं प्रापयितुं शक्नोति। अत्र सम्यक्त्वेन साधुत्वेन शब्दज्ञानं च व्याकरणशास्त्रेण

---

[26] मुण्डकोपनिषद् 1/1/5

[27] पाणिनीयशिक्षा 41-42

[28] महाभाष्यम् 6/9/84

एव सम्भवति । यतः साधुशब्दज्ञानं हि व्याकरणस्य साक्षात् प्रयोजनम्। परन्तु शब्दस्य सुष्ठु प्रयोगार्थं शिक्षाशास्त्रोक्तविधिना उच्चारणं कर्तव्यम्।

वेदस्यापरं नाम श्रुतिः। पुरा गुरूमुखात् पुनः पुनः श्रवणेनैव गुरूशिष्यपरम्परायां श्रुत्यामेव वेदः रक्षितः आसीत्। वेदो हि शब्दप्रधानशास्त्रम्। अतः तस्य शब्दस्वरूपरक्षणाय च वेदस्य विबिधाः पाठप्रकाराः प्रचलिता आसन् । संहितापाठः पदपाठः क्रमपाठः इति त्रिबिधः प्रकृतिपाठः जटा माला शिखा लेखा ध्वजो दण्डो रथो घनः इति अष्ट विकृतिपाठाः। सहस्रवर्षात् प्राक् वैदिकपरम्परायां शाखाभेदेन सम्प्रदायेषु यया पद्धत्या यादृशः पाठः क्रियते स्म अद्यापि तेषु सम्प्रदायेषु तादृसमेव मन्त्रोच्चारणं क्रियते वेदज्ञैः। इदञ्च उच्चारणं यदधुनापि सम्यक् रक्षितमस्ति तत् रक्षणन्तु शिक्षाग्रन्थैरेव सम्पादितम्।

शिक्षाशास्त्रेषु षट् विषयाः प्रतिपादिताः। वर्णः स्वरः मात्रा वलं साम सन्तानञ्च। तत्र वर्णालोचनावसरे वर्णोच्चारणविधिः उच्चारणस्थानादिकं यथार्थमालोचितम्। अतः *पाणिनीयशिक्षायां* यद्यपि व्याकरणं वेदपुरूषस्य मुखत्वेन स्वीक्रियते तथापि व्याकरणज्ञानात् पूर्वमपि शिक्षाशास्त्रज्ञानावश्यकत्वात् शिक्षावेदाङ्गं प्राथम्येनाङ्गीक्रियते। किञ्च शिक्षाशास्त्राण्येव अस्मान् शिक्षयन्ति अयं वर्णः, अयं स्वरः, इयं मात्रा , इदं वलम्, इदं साम , इदं सन्तानम्, एवं प्रकारेण उच्चारणं कर्तव्यमेवं प्रकारेण हस्तसञ्चालनं कर्तव्यमिति।

## प्रातिशाख्यानां शिक्षान्तःपातित्वम्

शिक्षादीनि षड्वेदाङ्गानि विविधेन उपायेन वेदमुपकुर्वन्ति। षड्विधवेदाङ्गसाहाय्येन वेदार्थाः सुस्पष्टाः निःसन्दिग्धाश्च भवन्ति। यद्यपि प्रातिशाख्यानां

वेदाङ्गरूपेण क्वचित् न प्रतिपादनं विहितं तथापि शिक्षाविषयाणां बाहुल्येन प्रतिपादनात् प्रातिशाख्यानां शिक्षायाम् अन्तर्भावः कर्तुं शक्यते। शाखां शाखां प्रति इत्यव्ययीभावसमासे प्रतिशाखमिति रूपं निष्पद्यते। प्रतिशाखे भवमिति प्रातिशाख्यम्। शिक्षादिवेदाङ्गेषु सामान्यतः विषयाः निरूपिताः परन्तु प्रातिशाख्येषु शाखाविशेषस्य नियमाः प्रतिपादिताः।

प्रातिशाख्यपदनिर्वचनानुसारं यद्यपि प्रतिशाखां प्रातिशाख्यग्रन्थाः भवेयुः परन्तु न तथा उपलभ्यते। तत्र ऋग्वेदस्य महर्षिशौनककृतम् *ऋग्वेदप्रातिशाख्यम्* अतीव प्राचीनं प्रामाणिकञ्च विद्यते। अत्र ऋग्वेदीयशिक्षाविषयानां प्रतिपादनमस्ति। प्रातिशाख्यमिदम् अष्टादशसु पटलेषु विभक्तम्। शुक्लयजुर्वेदस्य प्रातिशाख्यं हि कात्यायनप्रणीतं *वाजसनेयिप्रातिशाख्यम्*। प्रातिशाख्येऽस्मिन् अष्ट अध्यायाः सन्ति। कृष्णयजुर्वेदप्रातिशाख्यं हि *तैत्तिरीयप्रातिशाख्यमम्*। खण्डद्वये विभक्तं प्रातिशाख्यमिदं चतुर्विंशत्यध्यायविशिष्टम्। सामवेदस्य प्रातिशाख्यद्वयमुपलभ्यते। *ऋक्तन्त्रम् पुष्पसूत्रप्रातिशाख्यञ्च*। अथर्ववेदस्यापि प्रातिशाख्यद्वयमुपलभ्यते एकं शौनकीया *चतुरध्यायिका* अपरञ्च *अथर्ववेदप्रातिशाख्यम्*।

## शिक्षाग्रन्थानां समयः

भारतीयैतिहासिकपरम्परायां कस्मिंश्चित् ग्रन्थे ग्रन्थकृद्भिः स्वान्वयपरिचयः ग्रन्थरचनाकालादिकं यथार्थतया नोक्तम्। शिक्षाग्रन्थेष्वपि नास्य व्यत्ययो दृश्यते। तस्मात् शिक्षाग्रन्थानां कालः यथार्थतया निर्णेतुं न शक्यते। मन्त्रब्राह्मणयोर्मिलित्वा वेदः। आरण्यकोपनिषदोः ब्राह्मणे एव अन्तर्भावः। तस्मात् मन्त्रो ब्राह्मणम् आरण्यकम् उपनिषद् इति वेदस्य चत्वारे विभागः। ब्राह्मणसाहित्याद् एव शिक्षावेदाङ्गगतानां विषयानाम् उल्लेखः प्राप्यते।

*गोपथब्राह्मणे* आम्नातम् - **ओँकारो यजुर्वेद दीर्घप्लुतोदात्त एकाक्षर ओंकार सामवेदे।**[29] इति। शिक्षाशब्दस्य प्रथमं *मण्डुकोपनिषदि* षडभिः वेदाङ्गैः सह उपलभ्यत्वात् पृथग्वेदाङ्गरूपेण शिक्षायाः विचारः प्रारब्ध इति ज्ञायते।[30] परन्तु अधुना उपलब्धानां शिक्षाग्रन्थानां रचना उपनिषदुत्तरकाले संवृता। किञ्च शिक्षाग्रन्थेषु ऐतिहासिकतथ्याभावात् शिक्षाग्रन्थानां कालनिर्णये बहवो विद्वांस एव तूष्णीं सन्ति। सर्वेऽपि शिक्षाग्रन्थाः प्रतिशाख्येभ्यः परं विरचिता इति निश्चप्रचम्, यतः शिक्षाग्रन्थेष् कुत्रचित् प्रतिशाख्यस्योल्लेखः प्रप्यते। किञ्च बहव एव शिक्षाग्रन्थाः प्रातिशाख्यगतान् विषयान् आधिक्येन निगदन्ति। यदि प्रातिशाख्यानां कालः यथार्थतया निर्णेतुं शक्यते तर्हि शिक्षाग्रन्थकालोऽपि ज्ञातुं शक्यते परम्परावशात्, परन्तु तदपि न सम्भवति प्रातिशाख्यानां यथार्थकालज्ञानाभावात्। अधुना पूर्णरूपेण प्राप्तानां शिक्षाग्रन्थानां रचना बहुकालावधिं व्याप्य संवृता इति विषये नास्ति संशयः। द्वादशशतकात् पञ्चदशशतकात् पूर्वमेव शिक्षाग्रन्थानां रचना सञ्जाता इति केषाञ्चिन्मतम्। परन्तु सर्वे एव शिक्षाग्रन्थाः अस्मिन् पर्वणि न विरचिताः केचन तु तत्पूर्ववर्तिनि कालेऽपि विरचिताः। ड. सिद्धेश्वरवर्मामहाभागेन स्वविरचिते क्रिटिकाल-स्टाडिज्-इन-द्य-फोनेटिक-अवजार्भेशनस्-अफ-इण्डियान्-ग्रामारियन्स इत्याख्ये ग्रन्थे सयुक्त्या शिक्षाग्रन्थानां कालः ख्रीष्टीयपञ्चमशतकात् ख्रीष्टीयपञ्चदशतकः निर्धारितः। मद्गृहीतायाः *माण्डुकीशिक्षायाः* कालः तेन पञ्चमशतकः निर्णीतः।

---

[29] गोपथब्राह्मणम् 1/1/25

[30] ‘‘**तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः।**

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषम्।**’’ इति ( मुण्डकोपनिषद् 1/1/5)

## शिक्षाग्रन्थानां विषयः

कृष्णयजुर्वेदीयायाः *तैत्तिरीयोपनिषदः* शिक्षाध्याये वर्णः स्वरः मात्रा वलं साम सन्तानमिति शिक्षायाः षट् विषयाः आम्नाताः। आम्नातञ्च तत्र **- ओं शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा वलम्। साम सन्तानः।** इति।[31] अत्र वर्णपदेन अकारादयो वर्णा गृह्यन्ते। स्वरपदेन उदात्तादयो गृह्यन्ते। मात्रेति पदेन ह्रस्वदीर्घप्लुता बोध्यन्ते। वलत्वेन स्पृष्टेषत्स्पृष्टादिप्रयत्ना गृह्यन्ते। साम इत्यनेन वर्णानां मध्यमवृत्त्योच्चारणं समता बोध्यते। सन्तानं नाम संहिता। तस्मादुच्यते भगवता शंकराचार्येण **- तत्र वर्णः अकारादिः। स्वरः उदात्तादिः। मात्रा ह्रस्वाद्याः। वलं प्रयत्नविशेषः। मध्यम-वृत्त्योच्चारणं समता। सन्तानः सन्ततिः संहितेत्यर्थः।** इति।[32]

वैदिकवाङ्मये प्रायः सर्वेषां वेदानां शिक्षाग्रन्थः समुपलभ्यते यतः वैदिकवाङ्मये प्रतिवेदं तथा प्रतिशाखमुच्चारणधर्मादयो न सदृशाः। यद्यपि सर्वेषामपि शिक्षाग्रन्थानां प्रतिपाद्यं वर्णोच्चारणादिविषयालोचनम् एकमेव तथापि शिक्षायाः षट्सु विषयेषु सर्वे शिक्षाग्रन्थाः न ऐकमत्यं भजन्ते।

## कतिपयानां शिक्षाग्रन्थानां परिचयः

ड. सिद्धेश्वरवर्मामहाभागेन पञ्चषष्टिः शिक्षाग्रन्था उल्लिखिताः। तासु काश्चित् शिक्षाः पुस्तकरूपेण मुद्रिताः काश्चिच्च नाममात्रेणैव उपलभ्यन्ते। रामप्रसादत्रिपाठिना सम्पादिते सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः प्रकाशिते शिक्षासंग्रहे एकत्रिंशद् शिक्षाः संकलिताः।

---

[31] तैत्तिरीयोपनिषद् 1/2/1

[32] तैत्तिरीयोपनिषदः 1/2/1 शाङ्करभाष्यम्

प्रकाशिताः शिक्षाग्रन्थाः षोढाः विभक्तुं शक्याः। यथा साधारणशिक्षा, ऋग्वेदीयशिक्षा, शुक्लयजुर्वेदीयशिक्षा, कृष्णयजुर्वेदीयशिक्षा, सामवेदीयशिक्षा, अथर्ववेदीयशिक्षा।

### ***पाणिनीयशिक्षा***

साधारणशिक्षासु *पाणिनीयशिक्षा* अन्यतमा प्रथमा च। इयं शिक्षा न केवलं प्रातिशाख्यगतान् विषयान् वदति किञ्च अस्यां शिक्षायां शिक्षाङ्गस्य सर्वे विषयाः पूर्णरूपेण आलोचिताः। तस्माद् इयं शिक्षा सर्वासु शिक्षासु अग्रगन्या। अस्यां शिक्षायां पाणिनीयव्याकरणस्य प्रभावः परिलक्ष्यते। केषाञ्चिद् मतानुसारमस्याःशिक्षायाः रचयिता भगवान् पाणिनिः। केचिच्च इमां शिक्षां ऋग्वेदीया इति मन्यन्ते। शिक्षाङ्गस्य सर्वेषां विषयानां पूर्णरूपेण उपलभ्यत्वात् बहुत्र महाविद्यालयेषु विश्वविद्यालयेषु च पाठ्यक्रमान्तर्भुक्तास्ति इयं शिक्षा। अस्या शिक्षायाः व्याख्यानादिसहयोगेन बहूनि संस्करणानि उपलभ्यन्ते।

ऋग्वेदस्य शिक्षाद्वयस्य उल्लेखः प्राप्यते। *स्वरव्यञ्जनशिक्षा, शमानशिक्षा* च। रामप्रसादत्रिपाठिसम्पादिते शिक्षासंग्रहे अनयोः संकलनं नास्ति।

पराशरशिक्षानुसारं शुक्लयजुर्वेदस्य शिक्षाः अष्ट। तानि यथा *याज्ञवल्क्यशिक्षा, वशिष्ठशिक्षा, कात्यायनशिक्षा, पराशरशिक्षा, गौतमशिक्षा, माण्डव्यशिक्षा, अमोघानन्दिनीशिक्षा, पाणिनायशिक्षा* च। ( इयं पाणिनीया शिक्षा तु साधारणपाणिनीयशिक्षेतरा) समुपलब्धासु शिक्षासु कतिपयानां सामान्येन परिचयः प्रदीयते।

### ***याज्ञवल्क्यशिक्षा***

अस्याः शिक्षायाः नाम्नः एव अनुमीयते यत् अस्याः शिक्षायाः प्रणेतास्ति ऋषिः याज्ञवल्क्यः। द्वात्रिंशदधिकद्विशतश्लोकात्मिका इयं शिक्षा रामप्रसादत्रिपाठिसम्पादिते शिक्षासंग्रहे

संकलितास्ति। अपरासु यजुर्वेदीयशिक्षासु इयं शिक्षा हि प्रधाना पूर्णरूपा च। शुक्लयजुर्वेदप्रातिशाख्येन सह अस्याः शिक्षायाः सादृश्यं परिलक्ष्यते। शिक्षेयं स्वरप्रकरणं वर्णप्रकरणञ्चेति प्रकरणद्वयमुपेता। प्रत्येकेस्मिन् प्रकरणे शिक्षायाः विविधा विषयाः विस्तृतेनालोचिताः। अस्यां शिक्षायाम् उदात्तादिस्वराणां वर्णजातिदेवतादिविचारः, षड्जादिस्वराणाम् उदात्तादिषु अन्तर्भावः, स्वरितस्वरभेदाः, मन्त्रोच्चारणे हस्तसन्निवेशप्रकारपूर्वकं तच्चालने अङ्गुलिप्रदर्शनविधिः, लोपागमवर्णविकारप्रकृतिभावाः, वकारवैविध्यम् इत्यादयः विषयाः आलोचिताः।

***अमोघानन्दिनीशिक्षा***

शिक्षेयं केनचिदमोघानन्दनाम्ना विदुषा निर्मितेति शिक्षायाः प्रथमश्लोकेनैवावगम्यते। अस्यां शिक्षायां प्रथमम् ओष्ठ्या वर्णाः, ततः दन्त्या वर्णाः, ततः गुरुलघुतरभेदेन बकारस्य त्रैविध्यम्, ततः नादसंगकाः वर्णाः लक्षणोदाहरणसहिताः प्रोक्ताः। उक्तञ्च तत्र –

**अथ शिक्षां प्रवक्ष्यामि ह्यमोघानन्दकारिणीम्।**

**यस्याः श्रवणमात्रेण सर्वत्र विजयी भवेत्॥**

**ओष्ठ्या दन्त्या लघुश्चैव पुनरेव लघुतरः।**

**नादनासिक्यसहिताँलक्षणानि पृथक् पृथक्॥**[33] **इति।**

[33] अमोघानन्दिनी शिक्षा 1-2

शिक्षायामस्यां त्रिंशदधिकैकशतं श्लोकाः सन्ति। रामप्रसादत्रिपाठिसम्पादिते शिक्षासंग्रहे अस्याः शिक्षायाः संकलनमस्ति।

***माध्यन्दिनीयशिक्षा***

शुक्लयजुवेदस्य शिक्षेयं माध्यन्दिनमहर्षिप्रणीता माध्यन्दिनशाखान्तर्गता वेति नाम्न एव ज्ञायते। रामप्रसादत्रिपाठिसम्पादिते *शिक्षासंग्रहे* शिक्षेयं माध्यन्दिनमहर्षिप्रोक्ता इति संकलिता। अस्यां शिक्षायां चत्वारिंशत् श्लोकाः सन्ति।

***वर्णरत्नप्रदीपिका शिक्षा***

शिक्षेयं भरद्वाजकुलोद्भवेन अमरेशनाम्ना विदुषा प्रणीतास्ति। रामप्रसादत्रिपाठिसम्पादिते शिक्षासंग्रहे इयं संकलितास्ति। अस्यां शिक्षायां सप्तविंशत्यधिकद्विशतं श्लोकाः सन्ति। वर्णरत्नप्रदीपिका इति नामानुसारमेव अत्र वर्णस्वरसन्धीनां विस्तृतं वर्णनमुपलभ्यते। शिक्षायामस्यां स्वरव्यञ्जनयोः संख्या, वर्णानां स्थानम्, द्विरुक्ते वर्णे पूर्वपराङ्गत्वविचारः, जात्यातिस्वरितभेदानामालोचनम्, विसर्गलोपनियमः, सन्धिविचारः, यमोत्पत्तिः, वर्णदेवतादिविचारादिविषयाः अत्र समुपलभ्यन्ते।

***स्वराष्टकशिक्षा***

*शिक्षासंग्रहे* संकलितायाम् अस्यां शिक्षायां प्रथमं स्वराणां परिगणनं विधाय प्रातिशाख्यानुसारं सन्धिविधायकसुत्राणां निर्देशपुरस्सरं सोदाहरणं सन्धयः प्रतिपादिताः सन्ति। अत्र स्वरप्रकरणे उदात्तादिस्वरविवेचनकाले स्वरितस्वरः पञ्चधा इति प्रतिज्ञातं परन्तु विभागकाले तत्र चत्वारो विभागाः प्रदर्शिताः। तत्रोक्तं यथा-

- **स्वरित चञ्चधा।। जात्याभिनिहितक्षैप्रप्रश्लिष्टभेदात्।**[34] इति। अत्र जात्यः, अभिनिहितः, क्षैप्रः, प्रश्लिष्टः इति चत्वारः विभागाः दृश्यन्ते न पञ्च।

***गलदृक्शिक्षा***

गलदृक् नाम अतिक्रमविषयिनी ऋक्। संहितायामीदृशाः बहवः मन्त्राः सन्ति ये वारं वारं दृष्टाः। एवंविधाः मन्त्राः प्रथमवारं पूर्णतया पठ्यन्ते द्वितीयादिवारं तु तस्य मन्त्रस्य प्रतीकमात्रम् अर्थात् आदिभूतान् द्वित्रान् शब्दान् पठित्वा अग्रिममन्त्रः पठ्यते। नामानुसारमेव अस्यां शिक्षायां गलिताः मन्त्राः परिगणिताः इति ज्ञायते। अत्र यजुर्वेदसंहितायां प्रत्यध्यायं कति मन्त्राः गलिताः, के च ते, केषु केषु च अध्यायेषु गलदृचः अभावः इत्येते विषयाः आलोचिताः। रामप्रसादत्रिपाठिसम्पादिते *शिक्षासंग्रहे* शिक्षेयं संकलितास्ति।

***अवसाननिर्णयशिक्षा***

नाम्नः एव ज्ञायते यत् अवसाननिर्णयविषयिणी हीयं शिक्षा। अवसानं नाम विरामः। अष्टाध्यायीकृता पाणिनिना सूत्रं सूत्रितम् – **विरामोऽवसानम्** [35] इति।

**अवसानं तु वक्ष्यामि यथावदनुपूर्वशः**[36] इति प्रतिज्ञावचनानुसारतः यजुर्मन्त्रेषु कुत्र कुत्र कति वा विरामाः कर्तव्याः इत्यस्यां शिक्षायां निर्णीतम्। छन्दोबद्धे ऋगात्मके मन्त्रे अर्धर्चादौ विरामः निश्चितः परन्तु यजुर्मन्त्राणां गद्यात्मकत्वात् तेषामुच्चारणे कुत्र कुत्र कति वा विरामाः कार्य्याः इत्यस्यां शिक्षायामालोचितम्। रामप्रसादत्रिपाठिसम्पादिते *शिक्षासंग्रहे* शिक्षेयं संकलितास्ति।

---

34 स्वराष्टकशिक्षा 7

35 अष्टाध्यायी 1/4/10

36 अवसाननिर्णयशिक्षा 2

***वासिष्ठीशिक्षा***

शिक्षायामस्यां शुक्लयजुर्वेदसंहितायां प्रत्यध्यायं कति यजुंषि कति च ऋचः इत्येव संख्यातम्। उक्तञ्च तत्र –

**अथ शिक्षां प्रवक्ष्यामि वासिष्ठस्य मतं यथा।**

**सर्वाणुक्रममुद्धृत्य ऋग्यजुषोस्तु लक्षणम्॥**[37] इति।

यजुःशब्देन गद्यात्मको मन्त्रः, ऋक्शब्देन छन्दोबद्धो मन्त्रः उच्यते। एवं प्रकारेण शिक्षाग्रन्थे मन्त्राणां संख्यानस्य अयमेव उपयोगो भवितुमर्हति यत् यथा काव्येषु पुराणेषु च बहवः श्लोकाः प्रक्षिप्ताः भवन्ति येन काव्यादीनां मूलं स्वरूपं दुःस्पष्टं भवति। अयमेव प्रक्षेपजनितसमस्या यथा वेदे मा भवतु अतः यजुष्संहितायाम् ऋचां यजुषां च परिगणनं कृतम्। इयन्त्येव यजूंषि इयत्येव च ऋच इति। शिक्षेयं *शिक्षासंग्रहे* संकलितास्ति।

***कात्यायनीशिक्षा***

शुक्लयजुर्वेदीयायाम् अस्यां शिक्षायां त्रयोदश श्लोकाः सन्ति। रामप्रसादत्रिपाठिसम्पादिते शिक्षासंग्रहे अस्याः संकलनं दृश्यते। शिक्षया अनया वाजसनेयिप्रातिशाख्येन सादृश्यमस्ति। प्राधान्येनात्र स्वरविषयिनी आलोचना विहिता।

***व्यासशिक्षा***

कृष्णयजुर्वेदस्य तैत्तिरीयशाखान्तर्गता प्रसिद्धा शिक्षा हि व्यासशिक्षा। अस्याः शिक्षायाः संकलनं रामप्रसादत्रिपाठिसम्पादिते *शिक्षासंग्रहे* नास्ति। शिक्षेयं विद्वद्वरेण

---

[37] वासिष्ठी शिक्षा 1

पट्टाभिरामशास्त्रिणा वेदतैजसाख्यव्याख्यासहयोगेन वाराणसीस्थितेन वेदमीमांसानुसन्धानकेन्द्रेण सम्पाद्य प्रकाशिता। शिक्षायामस्याम् अष्टाविंशति प्रकरणानि पञ्चविशत्यधिकपञ्चशतं श्लोकाः सन्ति।

**अथ स्वरादिसंज्ञाश्च तत्प्रयोजनमेव हि ।** इत्यादिप्रतिज्ञावचनानुसारं संज्ञाप्रकरणादारभ्य उच्चारणफलप्रकरणपर्यन्तम् अष्टाविंशत्यां प्रकरणेषु वर्णानां संज्ञा, परिभाषा, दीर्घः, आगमः, लोपः, षत्वणत्वविवेकः, सन्धयः, स्वरधर्मः, हस्तस्वरविन्यासः, द्वित्वविवेकः, स्वरभक्तिः, स्थानकरणप्रयत्नाः, उच्चारणफलम् इत्यादयो विषयाः विस्तृतमालोचिता।

***नारदीयशिक्षा***

सामवेदीयशिक्षासु सर्वाग्रगण्या हि *नारदीयशिक्षा*। अस्यां शिक्षायां प्रपाठकद्वयमस्ति। प्रथमे प्रपाठके अष्ट कण्डिकाः, सप्तविंशत्यधिकैकशतं श्लोकाश्च सन्ति। द्वितीये प्रपाठके अष्ट कण्डिकाः चतुर्दशाधिकैकशतं श्लोकाश्च सन्ति। रामप्रसादत्रिपाठिसम्पादिते शिक्षासंग्रहे शिक्षेयं संकलितास्ति। अस्याः नाम्न एव ज्ञायते यद् इयं शिक्षा नारदमुनिप्रोक्ता। अस्यां शिक्षायां प्राधान्येन षड्जादिस्वराणाम् आलोचनमस्ति। सामगानम्, तानम्, उच्चारणदोषः, आर्चिकस्वरः, इत्यादयः विषया आलोचिताः। शिक्षायामस्यां षड्जादिस्वराणां वर्णजातिदेवतोच्चारणस्थानादिकं विस्तृतमालोचितम्।

अथर्ववेदीया शिक्षा हि *माण्डुकीशिक्षा*।

एतान् शिक्षाग्रन्थान् विहाय रामप्रसादत्रिपाठिसम्पादिते *शिक्षासंग्रहे मल्लशर्मकृताशिक्षा, षोडशश्लोकीशिक्षा, स्वरभक्तिलक्षणपरिशिष्टाशिक्षा, क्रमसन्धानशिक्षा*,

*मनःस्वारशिक्षा, प्रातिशाख्यप्रदीपशिक्षा, विसर्गाङ्गुलिप्रदर्शनप्रकारशिक्षा, क्रमकारिकाशिक्षा, शिक्षाप्रकाशः* इत्येते शिक्षाग्रन्थाः संकलिताः सन्ति।

शिक्षासंग्रहग्रन्थस्थिताः शिक्षाः व्यतिरिच्य *वाशिष्ठीशिक्षा*, *स्वराङ्कुशशिक्षा*, *लघ्वमोघनन्दिनीशिक्षा*, *षोडशश्लोकीशिक्षा*, *यजुर्विधानशिक्षा*,*चारायणीयशिक्षा*, *कौहूलीयशिक्षा*, *आपिशलीयशिक्षा*, *शैशिरीयशिक्षा*, *गालवशिक्षा*, *भारद्वाजशिक्षा*, *हारीतशिक्षा* इत्यादयः शिक्षाः श्रूयन्ते। आसु शिक्षासु काश्चित् विविधेन प्रकाशकेन प्रकाशिताश्च।

## *अथर्ववेदपरिशिष्टम्*

अथर्ववेदसम्बन्धानां विविधानां विषयाणां वर्णनमथर्ववेदपरिशिष्टे उपलभ्यते। समुच्चयप्रायश्चित्तानि, ब्रह्मकूर्चविधिः, सन्ध्योपासनाविधिः, स्नानविधिः, तर्पणविधिः, श्राद्धविधिः, अग्निहोत्रहोमविधिः, कौत्सनिरुक्तनिघन्टुः, ग्रहसंग्रहः, दन्त्यौष्ठविधिः, वर्णपटलमित्यादयो विषयाः पृथक्सु परिशिष्टेषु आलोचिताः। अथर्ववेदप्रातिशाख्ये वर्णादिविषये ये विषयाः सम्यक्तया नोक्ताः ते वर्णपटलाख्ये अथर्ववेदपरिशिष्टे उपलभ्यन्ते। तस्मात् मया अथर्ववेदपरिशिष्टं गृहीतम्।

## *वर्णपटलम्*

अथर्ववेदपरिशिष्टान्तर्गतं सर्वोत्कृष्टं परिशिष्टं *वर्णपटलम्*। अथर्ववेदपरिशिष्टेषु सप्तचत्वारिंशं परिशिष्टं वर्णपटलम्। **वर्णान् पूर्वं व्याख्यास्यामः प्रकृता ये च विकृताः** इति प्रतिज्ञानुसारमत्र वर्णपरिभाषा, वर्णवर्गीकरणम्, तत्तत्वर्गस्थवर्णसंख्या, वर्न्नस्थानानि, वर्णनिष्पत्तिप्रक्रिया, ह्रस्वदीर्घप्लुतस्वरविचारः इत्यादयो विषयाः प्रतिपादिताः वर्णपटले। परिशिष्टेऽस्मिन् त्रिषु अध्यायेषु षट्त्रिंशच्छलोकाः विद्यन्ते। *वर्णपटलं* पृथक्ग्रन्थरूपेण नोपलभ्यते। वोलिङ्गमहाभागेन (George Melville Bolling) नेगलेइनमहाभागेन (Julius Von

Negelein) च सम्पादिते The *Pariśiṣṭas* of the Atharvaveda इत्याख्ये ग्रन्थे *वर्णपटलं* पूर्णरूपेणोपलभ्यते। शिक्षान्तर्गतविषयाणामेव प्राधान्येनालोचितत्वात् अथर्ववेदान्तःपातित्वाच्च मदालोचनायां ग्रन्थोऽयं गृहीतः।

## मद्गृहीता *माण्डूकीशिक्षा*

माण्डूकीशिक्षानुसारमस्याः शिक्षायाः प्रणेतास्ति महर्षिः मण्डूकः। अस्याः शिक्षायाः समाप्तौ उच्यते-

**मण्डूकेन कृतां शिक्षां वुद्धिदीपिनीम्।**

**यो हि तत्वेन जानाति ब्रह्मलोकं स गच्छति॥** इति।[38]

अपि चास्याः शिक्षायाः द्वितीयप्रकरणस्य तृतीये श्लोके उच्यते-**....मण्डूकस्य मतं यथा** इति। आवैदिककालमेक एव मण्डूक आविर्भूत उत बहव इति निश्चयेन वक्तुं न शक्यते। वैदिककालादेकस्य मण्डूकर्षेरुल्लेखः प्राप्यते परन्तु स एव अस्याः शिक्षायाः प्रणेता इत्यपि निश्चयेन वक्तुं न शक्यते। मण्डूक्योल्लेखो भगवता पाणिनिना अष्टाध्यायीग्रन्थे कृतः। तेन चतुर्थाध्याये अपत्यप्रत्ययाधिकारे सूत्रं सूत्रितम् **ढक् च मूण्डकात्**[39] इति। अपत्यार्थे मण्डूकशब्दात् ढक्प्रत्ययो भवतीति सूत्रार्थः। पाणिनिप्रोक्तः अयं मण्डूकः ऋषिः पाणिनेः पूर्ववर्तीति निश्चितम्। यद्ययमृषिः माण्डूकीशिक्षायाः रचयिता स्यात्तदा अस्याः शिक्षायाः रचना ख्रीष्टपूर्वचतुर्थशतकात् पूर्वं जाता इति वक्तुं शक्यते। मण्डूकेन विरचिता शिक्षा माण्डूकी शिक्षा।

[38] माण्डूकीशिक्षा 16/16

[39] अष्टाध्यायी 4/1/19

ऐतरेयारण्यके माण्डूकेयनाम्नः ऋषेरुल्लेखः प्राप्यते – **इति ह स्माह ह्रस्वो माण्डूकेयः**[40] इति। ऋग्वेदप्रातिशाख्येऽपि प्रश्लिष्टस्वरितविषये माण्डूकेयस्योल्लेखः प्राप्तः – **माण्डूकेयस्य सर्वेषु प्रश्लिष्टेषु तथा स्मरेत्**[41] इति। अथर्ववेदपरिशिष्टे **माण्डूकेयं तर्पयामि** इत्युपलभ्यते। इमे सर्वे माण्डूकेयाः एक उत बहवः इति निश्चयेन वक्तुं न शक्यते परन्तु एतन्निश्चयेन वक्तुं शक्यते यत् एते सर्वे माण्डूकेयशब्दाः मण्डूकापत्यवाचकाः। अतः माण्डूकीशिक्षा एतेषां पूर्ववर्तिनि इति वक्तुं शक्यते। ऋग्वेदप्रातिशाख्यस्य कालः अमरकुमारचट्टोपाध्यायमहाभागेन स्वसम्पादिते ग्रन्थे ख्रीष्टपूर्वद्वितीयशतकात् पूर्वमिति उक्तम्। अतः अस्याः शिक्षायाः रचना ख्रीष्टपूर्वसमये जाता इति मे मतिः। माण्डूकीशिक्षायां षोडश प्रकरणानि एकाशीत्यधिकैकशतं श्लोकाश्च सन्ति।

*माण्डूकीशिक्षा* भूमिकासहयोगेन भगवद्दत्तेन लाहोरप्रदेशस्थात् दयानन्दमहाविद्यालयात् एकविंशत्यधिकनवदशशततमे(1921) आङ्गलवर्षे पुस्तकाकारेण प्रकाशिता। तत् पुस्तकमधुना पश्चिमवङ्गप्रदेशस्थायां संस्कृत-साहित्य-परिषदि उपलभ्यते। तदेव पुस्तकं परवर्तिनि काले मेहरचन्द-लछमनदास-पब्लिकेशन्स इति प्रकाशसंस्थया नइदिल्लीप्रदेशात् नवाधिकद्विसहस्रतमे आङ्गलवर्षे प्रकाशितम्। रामप्रसादत्रिपाठिसम्पादिते सम्पूर्णानन्दसंस्कृतविश्वविद्यालयात् उननवत्यधिकोनविंशतिशततमे(1989) आङ्गलर्षे प्रकाशिते शिक्षासंग्रहे अस्याः शिक्षायाः संकलनमस्ति। मया शोधप्रबन्धे भगवद्दत्तसम्पादितात् पुस्तकात् मूलरूपेण श्लोकाः गृहीताः।

---

[40] ऐतरेयारण्यकम् 3/1/5

[41] ऋग्वेदप्रातिशाख्यम् 3/14

# द्वितीयः अध्यायः

# माण्डूकीशिक्षानुमतः स्वरवर्णविमर्शः

*अथर्ववेदीयायां माण्डूकीशिक्षायां* वर्णस्वरविमर्श इत्याख्यस्य शोधप्रबन्धस्य माण्डूकीशिक्षानुमतं स्वरवर्णविमर्श इत्यभिधेये प्रथमे अध्याये अस्यां शिक्षायां स्वरवर्णसम्बन्धिनी या आलोचना उपलभ्यते सा मया उपस्थाप्यते। तदनन्तरम् अपराभिः शिक्षाभिः सह अस्याः शिक्षायाः स्वरवर्णालोचने सादृश्यं वैसादृश्यम् अभिनवत्वञ्च आलोच्यन्ते।

तैत्तिरीयोपनिषदः शिक्षाध्याये शिक्षायाः षट् विषयाः निगदिताः वर्णस्वरमात्रावलसामसन्तानानि।[42] एषु षट्सु विषयेषु वर्णो हि प्रधानः प्रथमश्च। यद्यपि अनेकासु शिक्षासु वर्णादिषण्णामेव विषयाणां विशदालोचनं न समुपलभ्यते परन्तु वर्णविषयिणी आलोचना सर्वासु एव शिक्षासु विस्तृतमुपलभ्यते।

**वर्ण वर्णने**[43] इति चुरादिगणीयाद् धातोः अच्प्रत्ययेन वर्णशब्दःनिष्पन्नः। वर्ण्यन्ते ध्वन्यन्ते इति वर्णाः, अकारादयः। तैत्तिरीयोपनिषदः शिक्षावल्यां भगवता शंकराचार्येण तद्भाष्ये उक्तम् अकारादयो हि वर्णाः।[44]अमरकोषे उच्यते – **वर्णो द्विजातौ शुक्लादौ स्तुतौ वर्णस्तु वाक्षरे।**[45]इति।

अर्थाद् वर्णशब्दस्य ब्राह्मणादिजातौ शुक्लादिरूपे, पूजायाम् अकाराद्यक्षरे च प्रसिद्धिः।[46] वर्णात् शब्दप्रतिपत्तिः, शब्दात् पदसिद्धिः, पदाद् वाक्यम्, पूर्णवाक्यश्रवणाच्च अर्थप्रतिपत्तिर्जायते। जनाः वाक्येन सुष्ठुतया भावं प्रकाशयितुं समर्थाः भवन्ति। अतः भावप्रकाशस्य तथा लोकव्यवहारस्य मूलं हि वर्णः, वर्णाद् विना शब्दाप्रतिपत्तेः।

---

[42] **''ओं शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा वलम्। साम सन्तानः।''** इति। (तैत्तिरीयोपनिषद् 1)

[43] अष्टाध्यायी धातुपाठः 1623

[44] 'शिक्षा ...तत्र वर्णः अकारादिः'।(तैत्तिरीयोपनिषद् 1/2 शाङ्करभाष्यम्)

[45] अमरकोषस्य नानार्थवर्गः 149

[46] ''वर्णो द्विजातिशुक्लादियशोगुणकथासु च। स्तुतौ ना न मेदरूपाक्षरविलेखने।'' इति मेदिनी।

वर्णोऽयं स्वरव्यञ्जनभेदेन द्विधा विभज्यते। अतः वर्णशब्देन स्वरव्यञ्जनात्मकः शब्दराशिरुच्यते। अतः वर्णशब्देन स्वरव्यञ्जनात्मकः शब्दराशिरुच्यते। लोके अक्षरशब्देन स्वरव्यञ्जनात्मकानां सर्वेषां वर्णानां ग्रहणे व्यामोहो दृश्यते, परन्तु अक्षरशब्देन केवलमेव स्वराणां ग्रहणं भवति। तस्मादुच्यते- सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम् इति। न क्षरन्ति यानि तान्यक्षराणि। येषां क्षरणं नास्ति नाम अपरसहायकं चलन नास्ति। अर्थात् येषामुच्चारणे अपरसाहाय्यं नापेक्षितम्। तानि च न अक्षराणि स्वरपदेन व्यपदिश्यन्ते। ऋग्वेदप्रातिशाख्ये स्वरमात्रस्यैव अक्षरसंज्ञा विधीयते। तत्रोक्तम्-

**सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम्** [47]इति।

न क्षरन्ति यानि तान्यक्षराणि। येषां क्षरणं नास्ति नाम अपरसहायकं चलनं नास्ति। अर्थात् येषामुच्चारणे अपरसाहाय्यं न अपेक्षितम्। तानि चाक्षराणि स्वरपदेन व्यपदिश्यन्ते। तस्मादुच्यते महाभाष्यकृता पतञ्जलिना – स्वयं राजन्ते इति स्वराः[48] इति। स्वयं राजन्ते नाम अपरसहायतां विना स्वयमुच्चारयितुं शक्यन्ते। स्वृ-शब्दोपतापयोः[49] इति भ्वादिगणीयाद् धातोः अच्प्रत्ययेन[50] स्वरशब्दो निष्पाद्यते। स्वर्यन्ते शब्द्यन्ते एभिरिति स्वराः, स्वरन्तीति स्वरा वा। स्वरशब्दस्य लक्षणप्रसङ्गे ऋग्वेदप्रातिशाख्यस्य उवटभाष्ये एते स्वराः[51] इति सूत्रभाष्ये भणितमुवटेन- स्वर्यन्ते शब्दन्त इति स्वराः[52] इति। नारदीयशिक्षायामुक्तम्- मात्रिकं द्विमात्रं वा स्वर्यते यदिहाक्षरम्।[53] इति। ऋग्वेदप्रातिशाख्ये सव्यञ्जनस्य सानुस्वारस्य शुद्धस्वरस्यापि अक्षरसंज्ञा

---

[47] ऋग्वेदप्रातिशाख्यम् 18/32

[48] महाभाष्यम् 1/2/29

[49] पाणिनीयधातुपाठः 1004

[50] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (अ. सू. 3/1/134) इति सूत्रेण।

[51] ऋग्वेदप्रातिशाख्यम् 1/3

[52] ऋग्वेदप्रातिशाख्यम् 1/3 उवटभाष्यम्

[53] नारदीयशिक्षा 2/3/6

विधीयते। तत्रोक्तम् - **सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम्** [54]इति। अथर्ववेदप्रातिशाख्येऽपि एवमेव ध्वनितः – **स्वरोऽक्षरम्** [55] इति। माण्डुकीशिक्षायामेकत्र[56] सव्यञ्जनस्य स्वरस्य अक्षरत्वमुक्तमेकत्र[57] शुद्धस्य स्वरस्यापि अक्षरत्वमङ्गीकृतम्।

वर्णसमाम्नाये स्वरव्यञ्जनात्मकाः ये वर्णाः समुपलभ्यन्ते तेषु स्वरान् विहाय अवशिष्टाः वर्णाः व्यञ्जनवर्णाः इति ज्ञायते। तस्मादेव ऋग्वेदप्रातिशाख्ये उक्तम्- **सर्वः शेषो व्यञ्जनानि ।**[58] इति। उक्तादन्यः शेष इति नियमात् पूर्वोक्तान् स्वरानुस्वारान् व्यतिरिच्य अन्येषां व्यञ्जनसंज्ञा भवति। तदेव स्पष्टीकृतमुवटाचार्येण स्वभाष्ये- **उपयुक्तेतरवचनः शेषशब्दः। स्वरानुस्वारव्यतिरिक्तः सर्वः शेषो वर्णराशिर्व्यञ्जनसंज्ञको वेदितव्यः।**[59] इति।

व्यञ्जनशब्दस्य लक्षणप्रसङ्गे महाभाष्यकृता पतञ्जलिना उच्यते – **स्वयं राजन्त इति स्वराः। अन्वग्भवति व्यञ्जनम्।** [60] इति। अचं विना विगता अञ्जना (अभिव्यक्तिः) यस्य तद् व्यञ्जनम्। अचं नाम स्वरं विना यस्य अभिव्यक्तिर्नाम उच्चारणं विगता नाम न सम्भवति तद् व्यञ्जनम्। अचः विना व्यञ्जनानाम् उच्चारणाभावः लोकत एव सिद्ध्यति। अस्माभिः स्वयमेव अनुमातुं शक्यते यत् अचः विना व्यञ्जनोच्चारणे वयमसमर्था एव।

माण्डूकीशिक्षायाम् अयमेव विषय एकया लौकिकोपमया सुष्ठु प्रतिपादितः। तत्रोक्तम् –

---

[54] ऋग्वेदप्रातिशाख्यम् 18/32

[55] अथर्ववेदप्रातिशाख्यम् 1/93

[56] सयकारं समं वाप्यक्षरं स्वरितं भवेत्। ( माण्डुकीशिक्षा 7/5)

[57] पूर्वं ह्रस्वं परं दीर्घमक्षरं यत्र दृश्यते। (माण्डुकीशिक्षा 9/4 )

[58] ऋग्वेदप्रातिशाख्यम् 1/6

[59] ऋग्वेदप्रातिशाख्यम् 1/6 भाष्यम्

[60] महाभाष्यम् 1/2/29

**दुर्वलस्य यथा राष्ट्रं हरते वलवान्नृपः।**

**स्वरो व्यञ्जनमासाद्य हरते नात्र संशयः।।**[61] इति।

अर्थाद् यथा लोके दृश्यते यद् बलवन्तः राजानः दूर्वलान् राज्ञःस्वशक्त्या ग्रसन्ते तथा स्वराः अपि व्यञ्जनान् ग्रसन्ते अभिभवन्ति वा। उवटाचार्येण व्यञ्जनशब्दस्य लक्षणप्रसङ्गे उक्तम् – **व्यञ्जयन्ति प्रकटान् कुर्वन्त्यर्थान् इति व्यञ्जनानि।**[62] इति।

वेदस्य रक्षणाय यथार्थववोधाय च शिक्षाग्रन्थानां प्रवृत्तिः। आवैदिककालं वेदस्य यथार्थोच्चारणरक्षणे शिक्षाग्रन्था एव मुख्यत्वं भजन्ते। तस्मात् प्रायःसर्वासु एव शिक्षासु वर्णोच्चारणविधिः समुपदिष्टा। वर्णोच्चारणविध्यादीनामालोचनात् पूर्वमेव वर्णानां संख्या निर्दिष्टा। स्वरव्यञ्जनभेदेन वर्णो द्विधा विभज्यते। परन्तु स्वरवर्णानां संख्या कति के च ते, व्यञ्जनवर्णानां संख्या कति व्यञ्जने केषां च अन्तर्भावः इति विषये सर्वे शिक्षाग्रन्थाः ऐकमत्यं न भजन्ते।

मद्गृहीतायां माण्डूकीशिक्षायां स्वरवर्णानां संख्याविषये या आलोचना विहिता सा मया उपस्थाप्यते। यद्यपि बहुषु शिक्षाग्रन्थेषु साक्षात् संख्यया एव वर्णसंख्या निर्दिष्टा,[63] परन्तु माण्डूकीशिक्षायाम् एवं नास्ति। तत्र तु विविधेन प्रसङ्गेन वर्णविषये उक्तम्। माण्डूकीशिक्षायामपि स्वरपदेन अकारादयो गृह्यते इत्यनुमातुं शक्यते। अत्र स्वरवर्णानां संख्या साक्षाद्रूपेण नोपदिष्टा। यतः शिक्षाग्रन्थाः बाहुल्येन तद्वेदस्य प्रातिशाख्यगतान् विषयान् आमनन्ति, अतः अथर्ववेदप्रातिशाख्यगताः विषयाः माण्डूकीशिक्षायामाम्नाता इति ज्ञायते माण्डूकीशिक्षायाः

---

[61] माण्डुकीशिक्षा 6/3

[62] ऋग्वेदप्रातिशाख्यस्य 1/6 उवटभाष्यम्

[63] यथा पाणिनीयशिक्षायाम् त्रिषष्टिश्चतुषष्टिर्वा वर्णाः शम्भुमते मताः। (पा. शि. 3)

अथर्ववेदान्तर्गतत्वात्। अतो वर्णसम्बन्धिनः ये विषया माण्डूकीशिक्षायां नोक्ताः ते तु अथर्ववेदप्रातिशाख्यसम्मता भवेयुः। अथर्ववेदप्रातिशाख्ये वर्णानां संख्यास्वरूपं स्थानानि च प्रतिपदोक्ततया नोपदिष्टानि। परन्तु तद्भाष्ये आथर्वणमभिमतं निरूपितमस्ति। किञ्चाथर्ववेदप्रातिशाख्यस्य परिशिष्टग्रन्थरूपेण स्वीकृते वर्णपटलाख्ये ग्रन्थे वर्णसंख्या साक्षात् निर्दिष्टास्ति। अतो वर्णपटलस्वीकृताः वर्णा एव मण्डूकर्षेः अनुमताः भवन्ति अथर्ववेदप्रातिशाख्यन्तर्गतत्वात्।

**माण्डूकीशिक्षानुमताः अकारादिस्वराः**

माण्डूकीशिक्षायां विविधेन प्रसङ्गेन स्वराणामुल्लेखः प्राप्यते। यथा लघुगुरुनिरूपणावसरे ऋकारस्योल्लेखः प्राप्यते – **''ऋकारे लघु तद्विद्याद्रेफे तद्गुरुसंज्ञकम्**[64]'' इति। स्वरभक्तिविवेचनावसरे ऋलृवर्णयोरुल्लेखः प्राप्यते- **''ऋलृवर्णौ तथा ज्ञेयौ स्वरभक्तीति संस्थितौ।**[65]'' इति। अकारस्य उकारस्य उल्लेखः स्वरभक्तिप्रसङ्गे[66], इकारस्य एकारस्य ओकारस्य च उल्लेखः स्वरितभेदानां लक्षणनिरूपणप्रसङ्गे[67] उपलभ्यते। अतः अ-इ-उ-ऋ-वर्णानां ह्रस्वदीर्घप्लुतभेदेन अ, आ, आ३, इ, ई, ई३, उ, ऊ, ऊ३, ऋ, ऋ२, ऋ३, द्वादश स्वराः। ततः लृवर्णस्य ह्रस्वप्लुतभेदेन तथा ए-ऐ-ओ-औ इति सन्ध्यक्षराणां दीर्घप्लुतभेदेन लृ, लृ३, ए, ए३, ऐ, ऐ३, ओ, ओ३, औ, औ३ इति कृत्वा द्वाविंशतिः स्वरा माण्डूकीशिक्षानुमता इति विज्ञेयः। लृकारस्य

---

[64] माण्डूकीशिक्षा 12/4

[65] माण्डूकीशिक्षा 9/8

[66] …अकारं चाप्युकारं च विच्छिन्नं विवृतं तथा। ( माण्डूकीशिक्षा 9/10)

[67] ए ओ आभ्यामुदात्ताभ्यामकारो रेफितश्च यः।
अकारं यत्र लुम्पन्ति तमभिनिहितं विदुः॥ (माण्डूकीशिक्षा 7/3)
इउवर्णौ यत्रोदात्तावापद्येते यवौ क्वचित्।
अनुदात्तप्रत्यये स्याद्विद्धि क्षैप्रस्य लक्षणम्॥ (माण्डूकीशिक्षा 7/6)

दीर्घस्वीकीरप्रसङ्गे अस्यां शिक्षायां किमपि नोक्तम्। वर्णपटले लृकारस्य दीर्घत्वं निवारितम्। तस्मादत्र मयापि दीर्घलृकारो न गृहीतो वर्णपटलस्याथर्ववेदपरिशिष्टत्वात्। वर्णपटले उक्तम्-

**अकारश्च इकारश्च उकार ऋकार एव च।**

**ह्रस्वदीर्घप्लुताः सर्वे लृवर्णे नास्ति दीर्घता॥**

**एकारश्च तथैकार ओकार औकार एव च।**

**दीर्घमात्रप्लुतास्तेषां संज्ञा सन्ध्यक्षराणि च॥**[68] इति।

चतुरध्यायिकाग्रन्थे पद्यलक्षणप्रसङ्गे केवलस्य लृकारस्योल्लेखः दृष्टः – **अन्लृकारः स्वरः पद्यः।**[69]

इति।

अतो मुण्डकाचार्यस्य मतानुसारेण स्वरा द्वाविंशतिरिति स्वीकार्यम्। वर्णपटले उच्यते च- **'स्वरा द्वाविंशतिः'** इति।

**शिक्षान्तरेषु अकारादिस्वराः**

आदावेव मयोच्यते यत् सर्वेषु विषयेषु सर्वाः शिक्षाः नैकमत्यं भजन्ते। स्वरवर्णानां संख्या माण्डूकीशिक्षानुसारं द्वाविंशतिः, परन्तु स्वरवर्णानां संख्याविषये शिक्षाग्रन्थेषु तथा प्रातिशाख्येषु आधिक्येन मतत्रयमुपलभ्यते। क्वचिदेकविंशतिः, क्वचिद् द्वाविंशतिः, क्वचिच्च त्रयोविंशतिः स्वराः स्वीकृताः सन्ति।

---

[68] वर्णपटलः 3/3-4

[69] चतुरध्यायिका 1/4

पाणिनीयशिक्षायामेकविंशतिः स्वराः स्वीकताः। तत्रोच्यते- **स्वरा विंशतिरेकश्च...**[70] इति। **त्रिषष्टिश्चतुष्षष्टिर्वा वर्णाः शम्भुमते मताः**[71] इति प्रतिज्ञानुसारं त्रिषष्टिवर्णपक्षे प्रथमं तत्र लृकारस्य प्लुतत्वं नाङ्गीकृतम्। तदा तेन अ, आ, आ३, इ, ई, ई३, उ, ऊ, ऊ३, ऋ,ऋ२, ऋ३,लृ, ए, ए३, ऐ, ऐ३, ओ, ओ३, औ, औ३ इति एकविंशतिः स्वराः स्वीकृताः। परन्तु त्रिषष्टिश्चतुष्षष्टिर्वा इति विकल्पयोर्मध्ये यदा चतुषष्टिः पक्षो गृह्यते लृकारस्य प्लुतत्वमङ्गीकृतम्। पाणिनीयशिक्षायामुक्तञ्च- **...दुस्स्पृष्टश्चेति विज्ञेय लृकारः प्लुत एव च।**[72] इति। अनया दृष्ट्या पाणिनीयशिक्षानुमताः स्वराः अपि द्वाविंशतिरेव।

वर्णरत्नप्रदीपिकाशिक्षायां स्वराणामेकविंशतिः संख्या निगदिता। तत्र नवस्वरवर्णेषु ऋकारपर्यन्तं ह्रस्वदीर्घप्लुतभेदेन त्रिधा, ह्रस्वलृकार एकः, तथा चत्वारि सन्ध्यक्षराणि दीर्घप्लुतभेदेन द्विधा इति कृत्वा एकविंशतिः स्वरा भवन्ति। तत्रोच्चते-

**एकविंशतिरुच्यन्ते स्वराः शब्दार्थचिन्तकैः।**

**द्विगुणानि व्यञ्जनानि ह्येतावान् वर्णसंग्रहः॥**

**ऋपर्यन्ताः स्वरास्त्रेधा लृकारो ह्रस्व एव च।**

**सन्ध्यराण्यह्रस्वानि ते चैवमेकविंशतिः॥** इति।[73]

षोडशश्लोकीशिक्षायां माण्डूकीशिक्षानुमताः एकविंशतिः स्वराः स्वीकृताः। तत्र एकविंशत्या स्वरैः सह वर्णसमाम्नाये त्रिषष्टिः वर्णाः स्वीकृताः। तत्रोक्तम्-

---

[70] पाणिनीयशिक्षा 4

[71] पाणिनीयशिक्षा3

[72] पाणिनीयशिक्षा5

[73] वर्णरत्नप्रदीपिका 11-12

**त्रयस्त्रिंशद्धसावर्णाः स्वरा द्वाविंशतिर्यमाः।**

**चत्वारश्च विसर्गोऽनुस्वार क पास्त्रिषष्टिकाः॥**[74] इति।

ऋग्वेदप्रातिशाख्यग्रन्थे **अष्टौ समानाक्षराण्यादितः, ततश्चत्वारि सन्ध्यक्षराण्युत्तराणि, एते स्वराः**[75] इति सूत्रत्रयं सूत्रितं शौनकाचार्येण। तेन अष्टौ समानाक्षराणि, चत्वारि सन्ध्यक्षराणि इति मिलित्वा प्रथमं द्वादश स्वराः स्वीकृताः। तदेव भाष्ये निगदितमुवटेन- **स्वर्यन्ते शब्द्यन्त इति स्वराः। यथा अ, आ, ऋ, ऋ२, इ, ई, उ, ऊ, ए, ओ, ऐ, औ इति।**[76] इति। ऋग्वेदप्रातिशाख्यस्य प्रथमपटलान्तर्गते त्रिंशत्तमे सूत्रे प्लुतस्यापि स्वरत्वमङ्गीकृतम् – **तिस्रः प्लुत उच्यते स्वरः।** इति। यद्यपि ऋग्वेदप्रातिशाख्ये साक्षात् लृकारस्योल्लेखः न दृश्यते परन्तु भाष्येण लृकारस्य स्वरत्वं ज्ञायते।[77] तेन अकारादीनां प्लुतग्रहणेन स्वरा एकविंशतिः भवन्ति। पुनश्च ऋग्वेदप्रातिशाख्ये व्यञ्जनत्वं स्वरत्वञ्चाङअगीकृतम् – **अनुस्वारो व्यञ्जनं वा स्वरो वा**[78] इति। तेनानुस्वारस्य स्वरपरत्वे ऋग्वेदप्रातिशाख्यानुसारेण द्वाविंशतिः स्वराः सिद्ध्यन्ति।

स्वराष्टकशिक्षायामष्टौ स्वरवर्णाः उक्ताः। अस्याः शिक्षायाः नाम्न एव ज्ञायते यदस्यामष्टौ स्वराः गृहीताः। अष्टानां स्वराणआं समाहारः स्वराष्टक इति। स्वराष्टकशिक्षाकारेण यद्यपि **अ इ उ ऋ लृ ए ओ ऐ औ इत्यष्टौ स्वराः** इति पङ्क्त्या स्वराणामष्टसंख्या निगदिता, परन्तु

---

[74] षोडशश्लोकीशिक्षा 2

[75] ऋग्वेदप्रातिशाख्यम् 1/1-3

[76] ऋग्वेदप्रातिशाख्यम् 1/3 उवटभाष्यम्

[77] ऋग्वेदप्रातिशाख्यस्य 1/19 उवटभाष्यम्

[78] ऋग्वेदप्रातिशाख्यम् 1/5

अत्र गणनाकाले नवसंख्यकाः स्वरा प्राप्यन्ते। अत्र मन्यते - **ऋलृवर्णयोः मिथः सावर्ण्यं वाच्यमिति** वार्तिकाभिप्रायं स्वीकृत्य अष्टसंख्या प्रतिपादिता।

पाणिनीयव्याकरणसम्प्रदाये द्वाविंशतिः स्वराः स्वीकृताः। अ, इ, उ , ऋ, लृ, इति पञ्च ह्रस्वस्वराः, आ, ई, ऊ, ऋ२, ए, ओ, ऐ, औ इत्यष्टौ दीर्घस्वराः, आ३, ई३, ऊ३, ऋ३, लृ३, ए३, ओ३, ऐ३, औ३ इति नव प्लुतस्वराः इति कृत्वा द्वादश। अस्मिन् व्याकरणसम्प्रदाये लृकारस्य दीर्घत्वं नाङ्गीकृतम्। भट्टोजिदीक्षितेन **मुखनासिकावचनोऽनुनासिकः** इति सूत्रवृत्तौ उच्यते- **...लृवर्णस्य द्वादश, तस्य दीर्घाभावात्।** इति। अर्थात् लृकारस्य दीर्घत्वं नाङ्गीकृत्य उदात्तानुदात्तस्वरितानुनासिकनिरनुनासिकभेदेन लृकारो द्वादश इति वृत्तेराशयः।

### माण्डूकीशिक्षायां स्वराणां मात्रा, मात्राकालश्च

यथार्थवर्णोच्चारणार्थं स्वराणां मात्राज्ञानमपेक्षितम्। तस्मात् सर्वैः शिक्षाकृद्भिः शिक्षाग्रन्थेषु मात्राकालः वर्णानां मात्रा च सम्यकतयोपदिष्टौ। मा माने[79] इत्यदादिगणीयाद् धातोः **हुयामाश्रुभसिभ्यस्त्रन्[80]** इत्यौनादिकसूत्रेण त्रन्प्रत्यये ततश्च टापि मात्राशब्दो निष्पन्नः। मीयते अनयेति मात्रा। किं मीयते इत्याकाङ्खायामुच्यते वर्णोच्चारणकालो मीयते अनयेति मात्रा। अर्थात् मात्रया वर्णानामुच्चारणकालः परिमाप्यते। *अमरकोषे* मात्राशब्दस्य परिमाणार्थः प्राप्यते – **मात्रा परिच्छदे। अल्पे च परिमाणे सा।[81]** *मेदिनीकोशे* मात्राशब्दस्य बहवः अर्था उपलभ्यन्ते –

**मात्राकर्णविभूषायां वित्ते माने परिच्छदे ।**

---

[79] अष्टाध्यायी धातुपाठः 1134

[80] उणादिसूत्रम् 4/130

[81] अमरकोषस्य तृतीयकाण्डान्तर्गते नानार्थवर्गे 541

**अक्षरावयवे स्वल्पे क्लीवं कार्त्स्न्येऽवधारणे॥**[82] इति।

प्राधान्येन वर्णोच्चारणकालस्य परिज्ञानार्थं मात्राशब्दः प्रयुज्यते। प्राचीनवैयैकरणाः कालविशेषे एव मात्राशब्दं गणयन्ति –

**कालेन यावता पाणिः पर्येति जानुमण्डले।**

**सा मात्रा कविभिः प्रोक्ता ह्रस्वदीर्घप्लुतमते मता॥ इति।**

अर्थात् हस्तसञ्चालनसहयोगेन मन्त्रोच्चारणकाले यावता कालेन हस्तं जानुमण्डलं प्राप्नोति स काल एव मात्राकालः। तेन वक्तुं शक्यते यत् उच्चारणसमयः यया परिमाप्यते सा मात्रा। कस्यापि ध्वनेः स्वरस्य वा उच्चारणाय कियान् समयोऽपेक्षितः इत्यस्य परिमाणं मात्रया ज्ञायते।

*माण्डूकीशिक्षायां* मात्रास्वरूपप्रसङ्गे उच्यते –

**अक्ष्णोर्निमेषमात्रेण यो वर्णः समुदीर्यते।**

**स एकमात्रो द्विस्तावान् दीर्घस्तु प्लुत उच्यते॥**[83]इति।

अक्ष्णोर्निमेषमात्राकालो नाम अक्षिपक्ष्मप्रक्षेपोपलक्षितः कालः। अस्माकं नयनयोः पक्ष्मद्वयं सर्वदा सञ्चालितं भवति जाग्रदवस्थायाम्। नयनयोः पक्ष्मसञ्चालनकाले एकवारं पक्ष्मसञ्चालने यत्किञ्चित् समयः अपेक्षितः स समयः एकमात्राकालः इति मण्डूकसिद्धान्तः। तादृशैकमात्राविशिष्टा हि ह्रस्वस्वराः, द्विमात्राविशिष्टाः दीर्घस्वराः, प्लुताश्च मात्रात्रयविशिष्टाः।

---

[82] मेदिनीकोशस्य रान्तवर्गे 75

[83] माण्डूकीशिक्षा13/1

लोकव्यवहारसम्पादने वर्णानां मात्रानिर्देशनादनन्तरं वेदपाठकाले ऋचां मध्ये कुत्र विरामः कतिमात्राविशिष्टः स्यात् इत्याकाङ्खायामुच्यते मण्डूकाचार्येण –

**अवग्रहेऽर्द्धमात्रं स्यात् कालो मात्रा पदान्तरे।**

**अर्द्धर्चे द्वे तथा त्रिमात्रं स्यादृगान्तरम्॥**[84] इति।

पदपाठकाले समासबद्धपदस्य प्रकृतिप्रत्यययुक्तपदस्य च व्युत्पत्तिप्रदर्शनाय यो विशेषः चिह्नो व्यवह्रीयते सोऽवग्रहनाम्नाभिधीयते। यथा - **ये त्रिषप्ताः परियन्ति विश्वा रूपाणि विभ्रतः**[85] इत्यथर्ववेदीयप्रथममन्त्रे त्रिषप्ताः पदे त्रयो वा सप्त वा इति विग्रहे बहुव्रीहिसमासत्वात् पदपाठे **त्रिऽसप्ताः** इत्यवं प्रकारेण अवग्रहचिह्नेन दर्शनीयम्। मण्डूकाचार्यस्य मतानुसारम् अयञ्चावग्रहः अर्धमात्राकालविशिष्टः स्यात्। पदान्तरे अर्थात् एकपदोच्चारणादनन्तरं परवर्तिपदोच्चारणात् प्राक् एकमात्राविशिष्टो विरामः कार्यः। अर्द्धर्चे नाम मन्त्रस्य अर्धावसाने मात्राद्वयपरिमितो विरामः कर्तव्यः। ऋचः अन्तिमे च त्रिमात्राकालः विरमणीयः इति मण्डूकाचार्यमतम्।

ननु अक्ष्णोर्निमेषमात्रेण मात्राकालनिर्धारणे क्लेशं भवति चेत् शिक्षाकृता प्रकृतेः विविधानां विहगानां कुजनेन मात्राकालः निर्देशितः। उच्यते मण्डूकाचार्येण –

**चाषस्तु वदते मात्रं द्विमात्रं वायसोऽब्रवीत्।**

**शिखी त्रिमात्रं विज्ञेय एष मात्रापरिग्रहः॥**[86] इति।

---

[84] माण्डूकीशिक्षा13/2

[85] अथर्ववेदसंहिता 1/1/1

[86] माण्डूकीशिक्षा13/3

अर्थात् नीलकण्ठाभिधेयस्य पक्षिणः कुजनम् एकमात्राकालविशिष्टम्। वायसः द्विमात्रया वदति, मयूरश्च त्रिमात्रया वदति इति तेषां कुजनमाधारीकृत्य मात्राकालः निर्धारणीयः। शिक्षान्तरेष्वपि पक्षिणां कुजनमाधारीकृत्य मात्राकालनिर्देशो दृश्यते।[87]

ह्रस्वस्वराणामुच्चारणकाल एकमात्रा, दीर्घस्वराणां द्विमात्रता, प्लुतानां त्रिमात्रता, इति विषये शिक्षाकृतः ऐकमत्यं भजन्ते। परन्तु मात्राकालनिर्णये शिक्षाकृत्सु मतभेदः परिलक्ष्यते।

**निमेषो मात्राकालः स्यात् विद्युत्कालस्तथापरे।**

**अक्षरात्तुल्ययोगाच्च मतिः स्यात् सोमशर्मणः॥**[88] इति।

इति याज्ञवल्क्यशिक्षावचनानुसारं ज्ञायते यत् केषाञ्चित् शिक्षाकृतां मतानुसारेण निमेषो मात्राकाल इति।[89] केषाञ्चित् मतानुसारं विद्युत्कालः अर्थात् यदा आकाशे विद्युत् विद्योदते तदा एकवारं विद्युतः विद्योतने यावत् समयः अपेक्षितः स समयः एव एकमात्राकालः इति केषाञ्चिन्मतम्। सोमशोमणः मतानुसारम् उच्चारणदृष्ट्या एकाक्षरस्य उच्चारणादनन्तरम् अपराक्षरोच्चारणे यः समयः अपेक्षितः स एव मात्राकालः। एतन्मतानुसारेण उच्चारणदृष्ट्या मात्राकालः स्वेनानुमेयः।

महर्षिणा याज्ञवल्क्येन तु स्वविरचितशिक्षायां मात्राकालः स्पष्टतया निर्दिष्टः।

---

[87] चाषस्तु वदते मात्रां द्विमात्रं चैव वायसः।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम्॥ इति (पा. शि. 49)

[88] याज्ञवल्क्यशिक्षा 10

[89] मन्ये अक्षणोर्निमेषमात्रेण इत्यादिश्लोकेन मण्डूकाचार्येण माण्डूकीशिक्षायां यो मात्राकालः प्रतिपादितः स एवात्र याज्ञवल्क्येन निमेषो मात्राकालेन निर्देशितः।

**सूर्यरश्मिप्रतिकाशाद् पणिका यत्र दृश्यते।**

**अनुत्वस्य तु सा मात्रा मात्रा च चतुराणवा ॥**[90] इति।

अर्थात् सूर्यरश्मेः प्रकाशे गवाक्षादिषु रजसः य क्षुद्रा कणिका दृश्यते, तस्याः कणिकायाः स्पन्दने यः समयः अपेक्षितः स समयः अनुमात्रेत्युच्यते। तादृशानां चतसृणामनुमात्राणां कालः एकमात्राकालः इति याज्ञवल्क्यमतम्। मात्राकालविषये शिक्षाकृत्सु मतवैविध्येऽपि यथार्थज्ञानलिप्सुभिः मात्राविरामादिज्ञानमवश्यकर्तव्यम्। मण्डूकाचार्येण यथार्थमेवोक्तम्-

**अक्षरज्ञो विरामज्ञः प्रत्यारम्भी तथैव च ।**

**स्वरमात्राविभागज्ञः स विप्रो मानमर्हति॥**[91] इति।

[90] याज्ञवल्क्यशिक्षा 11

[91] माण्डूकीशिक्षा 3/7

# तृतीयः अध्यायः

# माण्डूकीशिक्षानुमतो व्यञ्जनवर्णविमर्शः

स्वरवर्णवत् व्यञ्जवर्णानां प्रसङ्गेऽपि *माण्डूकीशिक्षायां* साक्षात् व्यञ्जनसंख्या न प्रतिपादिता। तत्र विविधेन प्रसङ्गेन व्यञ्जनवर्णानामुल्लेखः प्राप्यते। प्रथमं तत्र यमवर्णालोचनावसरे स्पर्शानामुल्लेखः दृश्यते-

**स्पर्शानामुत्तमैः स्पर्शैः संयोगाश्चेदनुक्रमात्।**

**आनुपूर्व्या यमास्तत्र जानीयाच्चतुरस्तथा॥**[92] इति।

अर्थात् स्पर्शवर्णानां तत्तद्वर्गस्य अन्तिमवर्णेन सह क्रमानुसारेण संयोगे सति यमवर्णोत्पत्तिरिति। अतोऽस्माच्छलोकात् एतत् ज्ञायते यत् मुण्डकाचार्येण कादयो मावसानाः पञ्चविंशतिः व्यञ्जनानि स्वीकृतानि। अपि च तेषां पञ्चसु वर्गेषु विभागोऽपि आचार्येण स्वीकृतः।

यमदोषनिरूपणप्रसङ्गे –

**वर्गान्ता यत्र दृश्यन्ते शषसैः सह संयुताः।**

**यमास्तत्र निवर्तन्ते श्मशानादिव बान्धवाः॥**[93] इति श्लोकेन,

क्रमविचारावसरे-

**यत्र चोभतः स्पर्शाः संयुक्ताः शषसैः सह।**

**आद्यस्तत्र क्रमो ज्ञेयो न परो बोधितो वुधैः॥**[94] इति श्लोकेन,

---

[92] माण्डूकीशिक्षा11/2

[93] माण्डूकीशिक्षा11/5

[94] माण्डूकीशिक्षा12/2

वर्णानां द्वित्वालोचनावसरे –

**वर्णा विंशतिरेकश्च येषां द्विर्भाव इष्यते।**

**प्रथमा मध्यमा चान्त्या यवलाः शषसास्तथा॥**

**न रेफे वा हकारे वा द्विर्भावो जायते क्वचित्।**

**न वर्गद्वितीयेषु न चतुर्थे कदाचन॥**[95] **इति** श्लोकेन च यरलवा इत्यन्तःस्था वर्णास्तथा शषसहा इत्युष्मवर्णा उल्लिखिताः *माण्डूकीशिक्षायाम्*। अत एते अन्तःस्थास्तथोष्माणो मण्डूकाचार्याभिमता इति ज्ञायते।

पुनः उष्मवर्मानामष्टविधगत्यालोचनाप्रसङ्गे जिह्वामूलीयस्य तथा उपध्मानीयस्य उल्लेखः दृष्टः। तत्रोच्यते-

**ओभावश्च विवृत्तिश्च शषसा रेफ एव च।**

**जिह्मूलीयमुपध्मा च गतिरष्टविधोष्मणः॥**[96] इति।

उच्चारणदोषनिरूपणावसरे विसर्जनीयस्य तथानुस्वारस्योल्लेखः प्राप्यते- **न च रेफानुस्वारे विसर्जनीये तु सर्वत्र।**[97] इति। किञ्च अस्यामेव शिक्षायामनुस्वारस्य त्रिविधो भेदः स्वीकृतः। तत्रानुस्वारस्वरूपालोचनावसरे उच्यते-

---

[95] माण्डूकीशिक्षा11/9-10

[96] माण्डूकीशिक्षा10/4

[97] माण्डूकीशिक्षा12/5

**अनुस्वारास्तु कर्तव्या ह्रस्वदीर्घप्लुतास्त्रयः।**

**अयँ राजा पशोर्मांसं क्षत्रियाणां धनूँषि॥**[98] इति।

अत्र चत्वारो यमवर्णाः स्वीकृताः। तत्रोक्तम्-

**स्पर्शानामुत्तमैः स्पर्शैः संयोगाश्चेदनुक्रमात्।**

**आनुपूर्व्या यमास्तत्र जानीयाच्चतुरस्तथा॥**[99] इति।

अर्थात् स्पर्शवर्णानां तत्तद्वर्गस्य अन्तिमवर्णेन सह क्रमानुसारेण संयोगे सति यमवर्णोत्पत्तिः स्यात्। ते च यमाश्चत्वारः।

अतो दृश्यते यत् विविधेन प्रसङ्गेन माम्डूकीशिक्षायां क, ख, ग, घ, ङ, च, छ, ज, झ, ञ, ट, ठ, ड, ढ, ण, त, थ, द, ध, न, प, फ, ब, भ, म इति पञ्चविंशतिः स्पर्शवर्णाः, य, र, ल, व इति चत्वारोऽन्तःस्थाः, श, ष, स, ह इति चत्वार उष्माणश्चत्वारो यमाः, विसर्जनीयः, जिह्वामूलीयः, उपध्मानीयः, त्रिविधोऽनुस्वार इति कृत्वा त्रिचत्वारिंशद् व्यञ्जनानि स्वीकृतानि। माण्डूकीशिक्षायामेतेषु व्यञ्जनेषु स्वीकृतेष्वपि तेषां वर्गादिविभाजनं न दृश्यते। तेषां वर्गादिविभाजनं तु वर्णपटले उपलभ्यते। तत्रोच्यते –

**.........कादयो व्यञ्जनं स्मृतम्।**

**पञ्चविंशतिरादैरेषां स्पर्शा वर्गाश्च पञ्चकः॥**[100] इति।

---

[98] माण्डूकीशिक्षा 8/11

[99] माण्डूकीशिक्षा11/2

[100] वर्णपटलम् 1/8

**शिक्षान्तरेषु व्यञ्जनानि**

अतो माण्डूकीशिक्षानुमतानि व्यञ्जनानि त्रिचत्वारिंशतदिति। परन्तु अन्यासु सर्वासु शिक्षास्वेवं नोपलभ्यते। प्रसिद्धायां पाणिनीयशिक्षायां द्वाचत्वारिंशद् व्यञ्जनानि स्वीकृतानि। तत्रोच्यते-

**........................स्पर्शानां पञ्चविंशतिः।**

**यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः॥**

**अनुस्वारो विसर्गश्च  क  पौ चापि पराश्रितौ।**

**दुस्स्पृष्टश्चेति विज्ञेय लृकारः प्लुत एव च॥**[101] इति।

अतः कादयो मावसानाः पञ्चविंशतिः स्पर्शाः, यादयश्चत्वारोऽन्तःस्थाः, शषसहाश्चत्वार उष्माणः, चत्वारो यमाः, अनुस्वारः, विसर्जनीयः, जिह्वामूलीयः, उपध्मानीयः, दुस्स्पृष्ट इति कृत्वा द्वाचत्वारिंशद् व्यञ्जनानि स्वीकृतानि पाणिनीयशिक्षायाम्। पाणिनीयशिक्षया सह माण्डूकीशिक्षायाः पार्थक्यमेतत् यत् माण्डूकीशिक्षायां दुस्स्पृष्टनामको वर्णो न स्वीकृतः। पुनः माण्डूकीशिक्षायामनुस्वारस्य त्रिविधो भेदः स्वीकृतो यस्तु पाणिनीयशिक्षायां न स्वीकृतः।

*वर्णरत्नप्रदीपिकाशिक्षायां* साक्षात् संख्यया एव त्रिषष्टिः वर्णाः प्रतिपादिताः। तत्रापि द्विचत्वारिंशद् व्यञ्जनानि स्वीकृतानि। तत्रोक्तम्-

[101] पाणिनीयशिक्षा 4-5

**एकविंशतिरुच्यते स्वराः शब्दार्थचिन्तकैः।**

**द्विगुणानि व्यञ्जनानि ह्येतावान् वर्णसंग्रहः॥**[102] इति।

शिक्षयामस्यामपि पाणिनीयशिक्षावत् पञ्चविंशतिः स्पर्शाः, यादयश्चत्वारोऽन्तःस्थाः, शषसहाश्चत्वार उष्माणः, चत्वारो यमाः, अनुस्वारः, विसर्जनीयः, जिह्वामूलीयः, उपध्मानीयः, दुस्स्पृष्ट इति कृत्वा द्वाचत्वारिंशद् व्यञ्जनानि। उक्तञ्च तत्र-

**ककारादिमकारपर्यन्ताः स्पर्शाः स्युः पञ्चविंशतिः।**

**चतस्रो यादयोऽन्तस्था उष्माणः शषसाः सहाः॥**

**स्पर्शानां पञ्चमैर्योगे चत्वारश्च यमाः स्मृताः।**

**उपध्मानीय इति च दुस्स्पृष्टश्च तथा परः॥**[103] इति।

अत्रोल्लेख्यं यत् दुस्स्पृष्टवर्णो यो *वर्णरत्नप्रदीपिकाशिक्षायां* तथा पाणिनीयशिक्षायामुक्तः स माण्डूकीशिक्षायां न प्रतिपादितः। मन्यते दुस्स्पृष्टवर्णस्य प्रायेण एव ऋग्वेदे उपलभ्यमानत्वात् ऋग्वेदीयीस्वेव शिक्षासु तत्परिगणनमुपलभ्यते।

*षोडशश्लोकीशिक्षा*यामपि त्रिषष्टिः वर्णाः प्रतिपादिताः। परन्तु तत्र व्यञ्जनान्येकचत्वारिंशत् स्वीकृतानि। तत्रोक्तम्-

**त्रयस्त्रिंशद्धशा वर्णाः स्वरा द्वाविंशतिर्यमाः।**

102 वर्णरत्नप्रदीपिकाशिक्षा 11

103 वर्णरत्नप्रदीपिकाशिक्षा 13-15

**चत्वारश्च विसर्गोनुस्वार  क  पस्त्रिषष्टिकाः॥**[104] इति।

अर्थात् पञ्चविंशतिः स्पर्शाः,  चत्वारोऽन्तःस्थाः, चत्वार उष्माणः,इति कृत्वा त्रयत्रिंशत्, ततः चत्वारो यमाः, अनुस्वारः, विसर्जनीयः, जिह्वामूलीयः, उपध्मानीयः इति कृत्वा एकचत्वारिंशद् व्यञ्जनानि षोडशश्लोकीशिक्षानुमतानि। अतोऽत्र दृश्यते यत् षोडशश्लोकीशिक्षा माण्डूकीशिक्षातः द्विव्यञ्जनोना। तच्चानुस्वारद्वयमेव, यतः षोडशश्लोकीशिक्षायामेक एवानुस्वारः स्वीकृतः माण्डूकीशिक्षायां त्रयः।

पाणिनीयव्याकरणसम्प्रदाये 'हयवरट्'  'लण्' 'ञमङणनम्, 'झभञ्', 'घढधष्', 'जबगडदश्', 'खफछठथचटतव्', 'कपय्', 'शषसर्', 'हल्' इति दशसु माहेश्वरसूत्रेषु चतुस्त्रिंशद् व्यञ्जनानि स्वीकृतानि। ततश्च अनुस्वारः, विसर्जनीयः, जिह्वामूलीयः, उपध्मानीयः चत्वारो यमाः इति कृत्वा व्यञ्जनानि द्विचत्वारिंशद् भवन्ति। परन्तु विशेषप्रयोजनसिद्ध्यर्थं 'हयवरट्' इति सूत्रे 'हल्' इति सूत्रे च हकारस्य द्विवारपठनात् अत्र हकारस्तु एक एव स्वीकर्तव्यः। तेन पाणिनीयव्याकरणानुसारं व्यञ्जनानियेकचत्वारिंशदिति विज्ञेयः। यद्यपि चतुर्दशसु माहेश्वरसूत्रेषु अनुस्वारविसर्जनीयजिह्वामूलीयोपध्मानीययमानामुल्लेखो नास्ति परन्तु भट्टोजिदीक्षितेन वाह्यप्रयत्नालोचनाप्रसङ्गे तेषामुल्लेखः कृतः – **वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः क  प  इति कपाभ्यां प्रागर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ। अं अः इत्यचः परानुस्वारविसर्गौ।**[105] इति।

एवमेव वर्णानां संख्याविषये वैयाकरणप्रातिशाख्यकारशिक्षाकारेषु मतपार्थक्यं दृश्यते। माण्डूकीशिक्षायां यद्यपि पञ्चषष्टिः वर्णाः स्वीकृताः परन्तु पाणिनीयशिक्षायां त्रिषष्टिः

---

[104] षोडशश्लोकीशिक्षा 2

[105] वैयाकरणसिद्धान्तकौमुद्यां वाह्यप्रयत्नप्रसङ्गः

चतुष्षष्टिः वा वर्णाः स्वीकृताः। वर्णरत्नप्रदीपिकाशिक्षायां त्रिषष्टिः वर्णाः प्रतिपादिताः। षोडशश्लोकीशिक्षायामपि त्रिषष्टिः वर्णाः प्रतिपादिताः परन्तु ते त्रिषष्टिवर्णाः वर्णरत्नप्रदीपिकाशिक्षानुमतभिन्नाः। यथा वर्णरत्नप्रदीपिकाशिक्षायामेकविंशतिः स्वराः स्वीकृताः परन्तु षोडशश्लोकीशिक्षायां द्वाविंशतिः स्वराः गृहीताः। पुनः *वर्णरत्नप्रदीपिकाशिक्षायां* दुस्स्पृष्टनामको वर्णः स्वीकृतः स *षोडशश्लोकीशिक्षायां* नाङ्गीकृतः। तैत्तिरीयशाखान्तर्गतायां *व्यासशिक्षायां* षट्षष्टिः वर्णाः स्वीकृताः। तत्रोक्तम्-

**...चतुर्भक्तियमाश्चेति वर्णाष्षट्षष्टिरीरिताः।**[106] इति।

**माण्डूकीशिक्षानुसारेण रङ्गवर्णविमर्शः**

रङ्गो हि वर्णविशेषस्य संज्ञास्ति। स वर्णः न तु वर्णसमाम्नाये पठितः। यद्यपि रङ्गवर्णस्य स्वरूपनिर्णयावसरे शिक्षाविदः नैकमत्यं भजन्ते तथापि अनुनासिकधर्मविशिष्टः वर्णविशेषः रङ्गनाम्ना अभिधीयते इति ज्ञायते। अत्रायं विशेषो हि सर्वे अनुनासिकवर्णाः रङ्गनाम्ना नाभिधीयन्ते किञ्च नकारविकारेण यत्रानुनासिक्यं भवति तत्रस्थः अनुनासिकः रङ्ग इति व्यपदिश्यते। शिक्षाग्रन्थेषु रङ्गवर्णस्य कृते रङ्ग इति व्यवहारोऽपि दृश्यते। माण्डूकीशिक्षायाम् रङ्गवर्णस्वरूपनिर्णयप्रसङ्गे उच्यते –

**नकारान्ते पदे पूर्वे स्वरे च परसंस्थिते ।**

**रक्तं वर्णं विजानीयान्न ग्रसेत्पूर्वमक्षरम्।।**

**रक्तं वर्णं यदा पश्येद्द्विवृत्या सह संस्थितम्।**

---

[106] व्यासशिक्षा 43

**व्यञ्जनान्तं विजानीयाद् गोमाँ इति निदर्शनम्।।** इति।[107]

अर्थात् नकारान्तस्य पदस्य स्वरवर्णे परे सति यत्र नकारस्य विकारो भवति तन्नकारपूर्वस्य स्वरस्य अनुनासिकत्वं जायते स अनुनासिकस्वरो हि रङ्गः। माण्डूकीशिक्षायां रङ्गवर्णस्य उदाहरणप्रसङ्गे उक्तम् - **गोमाँ इति।** इति। अत्र **गोमान् इति** इति स्थिते **दीर्घादटि समानपदे** [108] इति पाणिनीयसूत्रेण न्-कारस्य रुत्वादेशे **भोभगोअघोअपूर्वस्य योऽशि**[109] इति सूत्रेण रोः यादेशे **लोपः शाकल्यस्य** [110] इति सूत्रेण यकारलोपे **गोमा इति** इति स्थिते **अत्रानुनासिकः पूर्वस्य तु वा**[111] इति सूत्रानुवृत्त्या **आतोऽटि नित्यम्** [112] इति सूत्रेण आकारस्य अनुनासिकत्वे गोमाँ इति इति सिद्ध्यति। शौनकीयचतुराध्यायिकायाः **नकारस्य चटतवर्गोष्वघोषेष्वनूष्मपरेषु विसर्जनीयः**[113] इत्यनेन सूत्रेण ऋग्वेदप्रातिशाख्यस्य **नकार आकारोपधः पद्यान्तोऽपि स्वरोदयः। लुप्यते।**[114] इति सूत्रेण च गोमाँ इति इत्यत्र नकारलोपः आकारस्यानुनासिकत्वञ्च सिद्ध्यति। एवंविधैः प्रकारैः यदा नकारलोपे कृते पूर्ववर्तिनः स्वरस्य अनुनासिकत्वं विधीयते तदा स एव अनुनासिकः रङ्ग इत्यभिधीयते शिक्षाकारैः। परन्तु अनुनासिकः रङ्ग इति वक्तुं न शक्यते रङ्गस्य नासिकामात्रोच्चारणस्थानत्वात् अनुनासिकस्य **मुखनासिकावचनोऽनुनाकिकः** इति सूत्रेण मुखनासिकोच्चारणस्थानत्वाच्च। रङ्गवर्णस्य

[107] माण्डूकीशिक्षा 10/7-8
[108] अष्टाध्यायी 8/3/6
[109] अष्टाध्यायी 8/3/17
[110] अष्टाध्यायी 8/3/19
[111] अष्टाध्यायी 8/3/2
[112] अष्टाध्यायी 8/3/3
[113] चतुरध्यायिका 2/26
[114] ऋग्वेदप्रातिशाख्यम् 4/64

स्वरत्वमुत व्यञ्जनत्वमिति विषये शिक्षाकृतां मतवैविध्यं दृश्यते। माण्डूकीशिक्षायांम् अस्य व्यञ्जनत्वमङ्गीकृतम् – **व्यञ्जनान्तं विजानीयाद् गोमाँ इति निदर्शनम्।**[115] इति।

रङ्गवर्णस्य उच्चारणप्रकारः, उच्चारणस्थानम्, मात्रादिकञ्चापि समुपदिष्टम्। तत्र लौकिकदृष्टान्तेन रङ्गवर्णोच्चारणप्रकारः निर्देशितः। तत्रोच्यते-

**यथा सौराष्ट्रिका नारी अराँ इत्यभिभाषते।**

**एवं रङ्गाः प्रयोक्तव्या ङकारपरिवर्जिताः॥**[116] इति।

अस्य श्लोकस्यायमर्थो यथा सुराष्ट्रदेशभवा नार्यः तक्रविक्रयावसरे सानुनासिकम् अराँ इति प्रयुञ्जते तथैव ङकारश्रुतिपरिवर्जितः अर्धानुस्वारसदृशः गोमाँ इति इत्यत्र रङ्ग उच्चारणीयः। किञ्च नकारविकारेण उपधानुनासिक्ये जाते पूर्वाक्षरं न शीघ्रमुच्चारणायं न च हरणीयम् , तस्य तु दीर्घत्वेनोच्चारणं कर्तव्यम्।

*माण्डुकीशिक्षायां* रङ्गवर्णस्य उच्चारणस्थानं नासिका निर्दिष्टा, उच्चारणकालश्च द्विमात्रः। तत्रोच्यते-

**नासादुत्पद्यते रङ्गः कंसेन समनिष्पन्नः।**

**मृदुश्चैव द्विमात्रं स्याद् वृष्टिं मा इति निदर्शनम्॥**[117] इति।

---

[115] माण्डुकीशिक्षा 10/8

[116] माण्डुकीशिक्षा 10/9

[117] माण्डुकीशिक्षा 10/10

अर्थात् रङ्गवर्णः नासिकास्थानादुत्पद्य तदनन्तरं न विनश्यति। यथा कांस्यपात्रवादनादनन्तरं तस्य नादः किञ्चित् कालपर्यन्तं अनुरणति तद्वत् रङ्गवर्णोच्चारणकालेऽपि अनुरणनात्मकः नासिको नादः करणीयः। रङ्गवर्णस्य उच्चारणे द्विमात्राप्रयोगः भवति।

रङ्गवर्णोच्चारणविधिः बहुष्व शिक्षाग्रन्थेषु समुपलभ्यते। तत्र बहुत्र सादृश्यं किञ्चिच्च वैसादृश्यमुपलभ्यते। तत्र सामवेदीयायां नारदीयशिक्षायां माण्डुकीशिक्षागता संज्ञा एव शब्दान्तरेणोक्ता। नारदीयशिक्षायामुच्यते-

**नकारान्ते पदे पूर्वे स्वरे च परतः स्थिते।**

**अकारं रक्तमित्याहुर्नकारेण तु रज्यते॥**[118] इति।

*नारदीयशिक्षायां* रङ्गसम्बन्धिनि निषये सर्वत्रैव *माण्डूकीशिक्षया* सह सादृश्यं दृश्यते।

पाणिनीयशिक्षायामपि रङ्गोच्चारणविधिः एवमेव निरूपितः। तत्रोक्तम् –

**यथा सौराष्ट्रिका नारी तक्राँ इत्यभिभाषते।**

**एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया॥** [119] इति।

अत्र तु उदाहरणप्रसङ्गे ऋग्वेदस्य अष्टममण्डलान्तर्गतः[120] मन्त्राश उदाहृयते। माण्डूकीशिक्षायां यद्यपि रङ्गस्य द्विमात्रता निर्दिष्टा तथापि तत्र मात्राविभाजनं नोपदिष्टं यत् पाणिनीयशिक्षायां सम्यगुपदिष्टम्। पाणिनीयशिक्षायामुच्यते –

**हृदये चैकमात्रस्तु अर्धमात्रस्तु मूर्धनि।**

---

[118] नारदीयशिक्षा 2/4/5

[119] पाणिनीयशिक्षा 26

[120] ऋग्वेदसंहिता 8/77/3

**नासिकायां तथार्धञ्च रङ्गस्यैवं द्विमात्रता॥**[121] इति।

अर्थाद् हृदये मात्रा, मूर्धनि अर्धमात्रा, नासिकायाम् अर्धमात्रा इति द्विमात्रा रङ्गवर्णस्य। अस्य श्लोकस्य तात्पर्यं तु रङ्गवर्णे संलग्नःपूर्वः स्वरोऽनुनासिकः, अन्तिमः अर्धमात्रात्मको रङ्गशब्देन मुख्यतया व्यवहार्यो भागश्च सर्वनासिक्य इत्यवगम्यते।

याज्ञवल्क्यशिक्षायां रङ्गसम्बन्धिनि विषये यद्यपि बहुत्र मतैक्यं दृश्यते परन्तु रङ्गवर्णस्य मात्रानिरूपणावसरे तत्र मकपार्थक्यं परिलक्ष्यते। माण्डुकीशिक्षायां द्विमात्र इति उक्तः परन्तु याज्ञवल्क्यशिक्षायां द्विमात्रः मात्रिको वा इत्युच्यते। तत्रोक्तम्-

**द्विमात्रिको मात्रिको वापि नासामूलं समाश्रितः।**

**अन्ते प्रयुज्यते रङ्गः पञ्चमैः सानुनासिकः॥**[122] इति।

अत्र द्विमात्रिको रङ्गः स्वरयोः मध्यगतानुनासिक्यरूपः। यथा महाँ इन्द्रः इति, **लोकाँ अकल्पयन्**[123] इत्यत्र हकारात् परं ककारात् परं च आकारः स्वरपरे द्विमात्रिकः। अस्यां शिक्षायामयमेव विशेषः यत् मकारात् स्वरे परे एव विहितानुनासिक्यस्य रङ्गत्वव्यवहारः, अन्तःस्थोष्मषु परेषु च न रङ्गत्वव्यवहारः। अपि तु उपधानिका इति संज्ञान्तरं तत्र भवति। तस्मादुच्यते याज्ञवल्क्येन-

**अनन्तरं मकारस्य यो रङ्गस्तत्र दृश्यते ।**

**सर्वानुनासिकं विद्यादेषा मध्योपधानिका॥**[124] इति।

---

[121] पाणिनीयशिक्षा 28

[122] याज्ञवल्क्यशिक्षा 191

[123] शुक्लयजुर्वेदसंहिता 31/13

[124] याज्ञवल्क्यसंहिता 192

अर्थात् मकारात् परं अन्तःस्थोष्मषु परेषु सत्सु यो हि अनुनासिक्यः वर्णः प्रयुज्यते स सर्वानुनासिको वोध्यः। तस्य सर्वानुनासिकस्य न च रङ्गत्वव्यवहारः, तस्य तु उपधानिकेति व्यवहारः। तस्य उच्चारणकालो मात्रिक एव। तस्य उपधानिकानाम्नः रङ्गस्य स्वरूपनिर्णयावसरे याज्ञवल्क्येनोच्यते-

**यरलवाः शषसहा रज्यन्ते चोपधानिकाः।**

**वर्गान्ते रङ्गते यस्तु सर्वैः सर्वानुनासिकः॥**[125] इति।

श्लोकस्यास्य तात्पर्यं हि अन्तःस्थयुतानां स्वराणामुष्मभिश्च युतानां स्वराणां ये रङ्गा रज्यन्ते तत्र रङ्गश्रुतिः उपधानिका ज्ञेया इति। ताश्चोपधानिका अष्टावेव।

*माण्डूकीशिक्षायां* यद्यपि रङ्गस्य व्यञ्जनपरत्वमङ्गीकृतं परन्तु सामवेदीयायां लोमस्यां शिक्षायां रङ्गस्य व्यञ्जनपरत्वं स्वरपरत्वञ्च स्वीकृतम्। तत्रोच्यते-

**रङ्गस्तु द्विविधो ज्ञेयः स्वरपरो व्यञ्जनपरः।**[126] इति।

केचित्तु स्वरस्यैव रङ्गसंज्ञा इति वदन्ति, परन्तु तन्न यथार्थं रङ्गस्य नासिकामात्रोच्चारणस्थानत्वात् । कैश्चित्तु रङ्गस्य यत् अनुस्वारत्वमङ्गीकृतं तदपि न युक्तम् अनुस्वारविलक्षणोच्चारणत्वात्। रङ्गः अनुस्वारसदृशः भवितुमर्हति परन्तु अनुस्वारो न। अतः पृथग्रूपेण रङ्गः स्वीकरणीयः व्यवहरणीयश्चेति रङ्गविमर्शः।

---

[125] याज्ञवल्क्यशिक्षा 193

[126] लोमशी शिक्षा 1/6

## माण्डूकीशिक्षानुमतानि वर्णोच्चारणस्थानानि

कस्यापि वर्णस्योच्चारणे वायुः नाभिप्रदेशादागत्य स्वरतन्त्रीं संस्पर्श्य मुखाभ्यन्तरेषु विविधेषु स्थानेषु वाधाप्राप्तः सन् वर्णान् उच्चारयति। वर्णोच्चारणस्य प्रक्रिया *माण्डूकीशिक्षायां* नोपलभ्यते, परन्तु शिक्षान्तरेषूपलभ्यते। यथा आपिशलीयशिक्षायामुच्यते- **तत्र नाभिप्रदेशात् प्रयत्नप्रेरितः प्राणो नाम वायुरुर्ध्वमनुक्रामन्नुरःप्रभृतीनां स्थानानामन्यतमस्मिन् स्थाने प्रयत्नेन विधार्यते। स विधार्यमाणो वायुः स्थानमभिहन्ति, तस्मात् स्थानाभिघाताद् ध्वनिरुत्पद्यते आकाशे, सा वर्णश्रुतिः, स वर्णस्यात्मलाभः** इति।[127] प्राणवायुः यानि स्थानानि अभिहन्ति तानि माण्डूकीशिक्षानुसारमष्टौ। तत्रोक्तम्-

**अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।**

**जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च॥**[128] इति।

वर्णानाम् अष्टौ उच्चारणस्थानानि उल्लिख्य करणमपि मण्डूकाचार्येण प्रतिपादितम्। करणं नाम आभ्यन्तरप्रयत्नः। तानि च करणानि चत्वारि संवृतविवृतस्पृष्टेषत्स्पृष्टभेदात्। उक्तञ्च माण्डूकीशिक्षायाम् –

**वर्णानां तु प्रयोगेषु करणं स्याच्चतुर्विधम्।**

**संवृतं विवृतं चैव स्पृष्टमिषत्स्पृष्टमेव च॥**[129] इति।

ननु केषां वर्णानां करणं किमित्याकाङ्क्षायामुच्यते तत्र-

---

[127] आपिशलीयशिक्षा, नाभितलप्रकरणम् प्रथमसूत्रम्

[128] माण्डुकीशिक्षा 6/7

[129] माण्डुकीशिक्षा 6/8

**स्पर्शानां कारणं स्पृष्टमन्तस्थानामतोऽन्यथा।**

**यमानां संवृतं प्राहुर्विवृतं च स्वरोष्मणाम्।।**[130] इति।

अर्थात् ककारादिमकारपर्यन्तानां स्पर्शानां करणं हि स्पृष्टम्। अन्तःस्थानामतोऽन्यथा नाम यरलवानाम् अन्तस्थानां करणम् ईषत्स्पृष्टमिति। यमवर्णानां करणं संवृतं स्वरवर्णानाम् उष्मवर्णानां च करणं विवृतमिति मण्डूकसिद्धान्त। वर्णानां करणविचारे पाणिनीयव्याकरणेन सह माण्डूकीशिक्षायाः किञ्चित् सादृश्यं किञ्चित् वैसादृश्यं चोपलभ्यते। पाणिनीयव्याकरणानुसारमपि स्पर्शानां करणं स्पृष्टम्, अन्तःस्थानामिषत्स्पृष्टम्, उष्मणां तथा स्वराणां विवृतम्। परन्तु पाणानीयव्याकरणानुसारं संवृतं प्रयत्नं हि ह्रस्वस्य अवर्णस्य प्रयोगे भवति न तु यमानां करणं संवृतम्। उच्यते च भट्टोजिदीक्षितेन *वैयाकरणसिद्धान्तकौमुद्याम्* – **यत्नो द्विधा , आभ्यन्तरो वाह्यश्च। आद्यश्चतुर्धा स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात्। तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम्। विवृतमुष्मणां स्वराणां च। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्, प्रक्रियादशायां तु विवृतमेव।**[131] इति।

अत एवं प्रकारेण शिक्षाशास्त्रोपदिष्टं वर्णोच्चारणविधिमात्राकरणसंहितादिकं सर्वं यथार्थतया ज्ञात्वा वर्णप्रयोगः कर्तव्यः, अन्यथा अनिष्टापत्तिः। सुष्ठु वर्णप्रयोगार्थं माण्डूकीशिक्षायां एका उपमा प्रतिपादिता-

**यथा व्याघ्री हरेत् पूत्रान् दंष्ट्राभिर्न च पीडयेत्।**

**भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्।।**[132] इति ।

---

[130] माण्डुकीशिक्षा 6/9

[131] वैयाकरणसिद्धान्तकौमुदी 10

[132] माण्डूकीशिक्षा 3/7

अर्थात् शावको मुखात् पतेत् इति मत्वा शावकस्य चर्म छिद्रितं भवेत् वा इति मात्वा भीता व्याघ्री यथा सावधानतया समुचितेन करणप्रयोगेन शावकान् दंष्ट्राभ्यां वहति न च तान् दंष्ट्राभ्यां पीडयति, तथैव समुचितेन करणप्रयोगेन समुचितयत्नेन च वर्णोच्चारणकर्ता वर्णान् उच्चारयेत्। करणस्य अतिशिथिलप्रयोगेन वर्णान् अस्पष्टानपि न कुर्यात् अतिदृढेन प्रयोगेन वर्णान् रूक्षानपि न कुर्यादिति आचार्यस्याशयः। शिक्षान्तरेष्वपि वर्णप्रयोगस्य एवं वर्णनमुपलभ्यते। एवंप्रकारेण सम्यक्तया वर्णप्रयोगेन प्रयोगकर्ता ब्रह्मलोकं प्राप्नोति इति मण्डूकाचार्यमतम्। उच्यते च तद्विरचितशिक्षायाम्-

**एवं वर्णाः प्रयोक्तव्याः न मुक्ता न च पीडिताः।**

**सम्यग्वर्णप्रयोगेन ब्रह्मलोके महीयते॥**[133] इति।

[133] माण्डूकीशिक्षा 4/8

# चतुर्थः अध्यायः

## माण्डूकीशिक्षानुमतः उदात्तादिस्वरविमर्शः

**स्वृ-शब्दोपतापयोः**[134] इति भ्वादिगणीयाद् धातोः **पुंसि संज्ञायां घः प्रायेण**[135] इत्यनेन सूत्रेण करणे घप्रत्ययेन स्वरशब्दो निष्पन्नः। स्वर्यन्ते अर्था एभिरिति स्वरा उदात्तादयः। स्वर्यन्ते नाम प्रकटीभवन्ति सम्यक्-ज्ञायन्ते इति वा। उदात्तादिस्वरेणैव शब्दानां सम्यगर्थज्ञानं जायते। यथा व्यन्-प्रत्ययान्तः **ञ्नित्यादिर्नित्यमिति**[136] सूत्रेण आद्युदात्तो भवति भ्रातृव्यशब्दः शत्रुपर्यायः व्यत्प्रत्ययान्तः **तित्-स्वरितमिति** सूत्रेण अन्तस्वरितः भ्रातृव्यशब्दः भ्रातुष्पुत्रः। इममेवाशयमधिकृत्य व्याकरणप्रयोजनालोचनाप्रसङ्गे महाभाष्यकृतोच्यते –

**दुष्टः शब्दः स्वरतो वर्णतो वा**

**मिथ्याप्रयुक्तो न तमर्थमाह।**

**स वाग्वज्रो यजमानं हिनस्ति**

**यथेन्द्रशत्रुः स्वरतोऽपराधात्॥**[137] इति।

अतः स्वरज्ञानं विना असम्भवि सूक्ष्मार्थविज्ञानम्, तद्विना च वेदार्थाद् दूरेऽपास्तः शब्दराशिः निगदेनैव शब्दितः सन् अज्ञानं दूरीकर्तुमक्षमो भवति। अतो मानवानां प्रधानपुमर्थलाभाय यथार्थवेदार्थज्ञानाय स्वरो विज्ञेयः। स्वरेणैव शब्दानामर्थः स्फुटो भवति। उच्यते च ऋग्वेदानुक्रमणीग्रन्थे –

**अन्धकारे दीपिकाभिर्गच्छति स्खलति क्वचित्।**

**एवं स्वरैः प्रणीतानां भवन्त्यर्थाः स्फुटा इति॥** इति।

---

[134] पाणिनीयधातुपाठः 1004

[135] अष्टाध्यायी 3/3/118

[136] अष्टाध्यायी 6/1/167

[137] महाभाष्यम् 1/14

अतःयथाशक्ति निरुक्तिं विधाय स्वरञ्च निर्धार्य्यैव वेदार्थो निर्णेयः। तथासति स्वरमननुसृत्य कृतं वेदव्याख्यानं मूलमभिधातुमक्षममेव।

पाणिनीयव्याकरणे साधारणतया स्वरशब्देन अचां ग्रहणं भवति। वीणादिवाद्ययन्त्राणां शब्दोऽपि स्वरशब्देन गृह्यते। स्वरशब्देन षड्जादीनामपि ग्रहणं भवति। परन्तु स्वरशब्देन प्राधान्येन अचामुदात्तादिधर्मा बोध्यन्ते। *अमरकोषे* उच्यते- **उदात्ताद्यास्त्रयः स्वराः** इति। तैत्तिरीयोपनिषदः शिक्षावल्ल्यां शिक्षायाः ये षट् विषया आम्नाताः तेष्वन्यतमस्तथा द्वितीयो हि स्वरः। तत्रैव भाष्यकृता शंकराचार्येण स्वरशब्देन उदात्तादयः प्रदर्शिताः – **स्वरः उदात्तादिः** इति।

यद्यपि वर्णमात्रधर्मत्वात् उदात्तत्वादयो यथा अचां धर्मस्तथा हलामपीति व्यामोहो लोके दृश्यते। परन्तु तन्न यथार्थम्। एते धर्मा हलां भवितुं नार्हन्ति। तस्माद् भट्टोजिदीक्षितेन **उच्चैरुदात्तः** इति सूत्रवृत्तावुच्यते – **ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात्।** इति। अतः शास्त्रे उदात्तानुदात्तस्वरितपदैः उदात्तत्वानुदात्तत्वस्वरितत्वगुणविशिष्टाः अचः व्यवह्रीयन्ते, न तु हलः। यतो हलं विनापि अचि एते उदात्तत्वादयो धर्माः दृश्यन्ते। यथा-

**यः सुन्वते पचते दुध्र आ चि-**

**द्वाजं ददर्षि स किलासि सत्यः।**[138]

इति मन्त्रे हलं विनापि आ इत्युदात्तः। किञ्च हलामुच्चारणमपि अचं विना न सम्भवति का कथा उदात्तादिस्वराणाम्। यदि हलामप्येते धर्माः स्युस्तदा वैदिकवाक्ये एकस्मिन्नेव वर्णे हलामचामिति कृत्वा स्वरद्वयमुपलभ्येत। परन्तु तन्न प्राप्यते। अत एतन्निश्चितं यत् हलां तथा व्यञ्जनानां पृथक्स्वरो नास्ति। एतच्च शिक्षाग्रन्थेष्वपि परिलक्ष्यते। यथा नारदीयशिक्षायामुच्यते-

---

[138] ऋक्संहिता 2/12/15

**स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च।**

**व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति सः स्वरः॥**

**स्वरप्रधानं त्रैस्वर्यमाचार्याः प्रतिजानते।**

**मणिवद् व्यञ्जनं विद्यात् सूत्रवच्च स्वरं विदुः॥[139] इति।**

अत्रोल्लेख्यं यत् व्यञ्जने यः अच्स्वरः प्रतिभासते स तु परेणैवाचा सम्बध्यते न पूर्वेण। यथा **अग्निमीले पुरोहितम्...** इति ऋग्वेदीयप्रथममन्त्रे लकारोत्तरो यः प्रचयस्वरः प्रतिभासते स तु लकारोत्तरस्य एकारस्य न तु लकाररपूर्वस्य इकारस्य।

एते स्वराः कतीति विषये शिक्षाकृत्सु तथा व्याकरणाचार्येषु मतभेदो दृश्यते। केषाञ्चिन्मतानुसारेण स्वर उदात्तानुदात्तस्वरितभेदेन त्रिविधः, केषाञ्चिन्मतानुसारेण उदात्तानुदात्तस्वरितप्रचयभेदेन चतुर्विधः, केषाञ्चिन्मतानुसारं तदधिकश्च। मद्गृहीतायां माण्डूकीशिक्षायामुदात्तानुदात्तस्वरितप्रचयभेदेन चत्वारः स्वराः स्वीकृताः। उक्तञ्च तत्र-

**उदात्ताश्चानुदात्तश्च स्वरितः प्रचितस्तथा।**

**चतुर्विधः स्वरो दृष्टः स्वरचिन्ताविशारदैः॥[140]** इति।

[139] नारदीयशिक्षा 2/5/2-3

[140] माण्डुकीशिक्षा 2/5

## माण्डूकीशिक्षायामुदात्तानुदात्तस्वरितप्रचयस्वरूपविमर्शः

माण्डूकीशिक्षायामुदात्तानुदात्तस्वरितप्रचयाः चत्वारः स्वराः प्रतिपादिताः। परन्तु उदात्तादीनां लक्षणं तत्र साक्षात् न प्रतिपादितम्। तत्र उदात्तादीनां स्वरूपं प्रतिपादितं विविधैः श्लोकैः। एकत्रोच्यते-

**यदुदात्तमुदात्तं तद्यत्स्वरितं तत्पदे भवति नीचम्।**

**यन्नीचं नीचमेव तद्यत्प्रचयस्थं तदपि नीचम्॥[141] इति।**

श्लोकस्यार्थो हि य उदात्तः स प्रकृत्या उदात्त एव। यः स्वरितः स तु प्रकृत्यानुदात्त एव, उदात्तपरविद्यमानत्वात् तस्य स्वरितत्वं जायते। योऽनुदात्तः स तु प्रकृत्या एवानुदात्तः। यः प्रचयः स तु प्रकृत्यानुदात्तः , तस्यानुदात्तस्य स्वरितपरविद्यमानत्वात् प्रचयत्वं जायते। उदात्तादीनामिदं स्वरूपं पाणिनीयव्याकरणेऽपि दृश्यते। तत्रापि उदात्तात् परस्यानुदात्तस्य **उदात्तादनुदात्तस्य स्वरितः** इति सूत्रेण स्वरितत्वं जायते। स्वरितात् परस्यानुदात्तस्य **स्वरितात् संहितायामनुदात्तानाम्** इति सूत्रेण प्रचयत्वं जायते।

प्रचयस्वरस्य स्वरूपं *माण्डूकीशिक्षायां* स्पष्टं प्रतिपादितम्। तत्रोक्तम्-

**स्वरितात्पराणि यानि स्युरनुदात्तानि कानिचित्।**

**सर्वानि प्रचयं यान्ति ह्युपोदात्तं न विद्यते॥[142]** इति।

---

[141] माण्डुकीशिक्षा 5/3

[142] माण्डुकीशिक्षा 5/7

अर्थात् स्वरितस्वरात् परं योऽनुदात्तः ये अनुदात्ताः वा सन्ति ते सर्वे प्रचया भवन्ति। **स्वरितात् संहितायामनुदात्तानाम्**[143] इति पाणिनीयसूत्रेणापि अयमेव प्रतिपादितः। अपि चोच्यते तत्र यत् प्रचयस्वरात् परे विद्यमानमुदात्तं स्वरितं वा अनुदात्तरूपेण विज्ञेयम्। तत्रोक्तम्-

**स्वरितप्रभवप्रचितात् स्वरितं विद्यत उदात्तं वा।**

**अनुदात्तमेव तद्विद्यातृतं च तद्विद्धि यत्प्रचितम्॥**[144] इति।

उदात्तादीनामुच्चारणप्रसङ्गे माण्डूकीशिक्षायामुच्यते-

**उदात्ताच्च न कर्तव्यमुदात्तं स्वरितं तथा।**

**नाचान्नीचतरन्नास्त्युच्चादुच्चं न विद्यते॥**

**उच्चादुच्चतरन्नास्ति नीचान्नीचतरं कुतः।**

**स्वरितात् स्वरितन्नास्ति कम्पिताच्च कम्पितम्॥**[145] इति।

प्रथमश्लोकस्यान्वय एवं स्वीकरणीयः यत् उदात्तादुदात्तं स्वरितं न कर्तव्यम्, अर्थात् उदात्तात् पर् विद्यमानस्य अनुदात्तस्यैव स्वरितत्वं भवति न तूदात्तस्य। नीचान्नीचतरं नास्ति नाम अनुदात्तादपि अनुदात्तो नास्ति। एवं स्वीकृते सति तस्याप्यनुदात्तापत्तिरूपानवस्थादोषप्रसङ्गः स्यात्। द्वितीये श्लोकेऽपि उच्यते यत् उदात्तादपि उदात्तं तथा स्वरितादपि स्वरितं नास्ति।

---

143 अष्टाध्यायी 1/2/39

144 माण्डुकीशिक्षा 5/6

145 माण्डुकीशिक्षा 5/1

**चतुरध्यायिकानुसारः उदात्तादिस्वरः**

*चतुरध्यायिकाग्रन्थः अथर्ववेदस्य* प्रातिशख्यग्रन्थरूपेण प्रसिद्धः। *माण्डूकीशिक्षायां* यद्यपि उदात्तादीनां साक्षातं संज्ञा न प्रदत्ता परन्तु चतुरध्यायिकाग्रन्थे तेषां संज्ञा साक्षात् प्राप्यते। चतुरध्यायिकाग्रन्थे उदात्तसंज्ञाप्रसङ्गे उच्यते- **समानयमेऽक्षरमुच्चैरुदात्तम्**[146] इति। समानयमे नाम समानस्वरे। कोऽपि वक्ता उच्चस्वरेणोच्चारणं करोति कोऽपि नीचस्वरेण। तस्मिन्नेव उच्चैः नीचैः स्वरे वा समाने इति भावः। तस्मिन् समानयमे समानस्वरे समानोच्चारणस्थाने उच्चैः मूर्ध्न्यादीनामुपरिभागे जातेन प्रयत्नेन उच्चार्यमाणमक्षरमुदात्तम्। यथा अकारस्य उच्चारणस्थानं कण्ठः अकुहविसर्जनीयानां कण्ठः इति नियमानुसारेण। तत्र अकारस्योच्चारणं कण्ठस्योर्ध्वभागे भवेत् चेत्तदा सोऽकारः उदात्तसंज्ञः उदात्तत्वधर्मविशिष्टो वा।

चतुरध्यायिकाग्रन्थे अनुदात्तलक्षणप्रसङ्गे उच्यते- **नीचैरनुदात्तम्**[147] इति। पूर्वसूत्रात् समानयमे अक्षरमिति पदद्वयस्यानुवृत्त्या सूत्रार्थो भवति समानस्वरे समानोच्चारणस्थाने नीचैः मूर्ध्न्यादीनामधोभागे जातेन प्रयत्नेन उच्चार्यमानमक्षरमनुदात्तसंज्ञकः। तथाहि इकारस्योच्चारणस्थानं तालुः **इचुयशानां तालुरिति** नियमात्। तत्र इकारस्योच्चारणं तालोः अधोभागे भवेत् चेत्तदा स इकारः अनुदात्तः।

*चतुरध्यायिकायां* स्वरितस्वरप्रसङ्गे उक्तम्- **आक्षितं स्वरितम्**[148] इति। आक्षिप्तं नाम तिर्यग्गमनमुच्चारणम्। पूर्वसूत्रात् समानयमे अक्षरमिति पदद्वयस्यानुवृत्त्या सूत्रार्थो भवति समानस्वरे समानोच्चारणस्थाने वायोः तिर्यग्गमनेन उच्चार्यमानमक्षरं स्वरितसंज्ञकः स्यात्। ऋग्वेदप्रातिशाख्यग्रन्थे उवटाचार्येण आक्षेपपदस्यार्थः प्रदर्शितः – **आक्षेपो नाम तिर्यग्गमनं**

---

[146] चतुरध्यायिका 1/1/14

[147] चतुरध्यायिका 1/1/15

[148] चतुरध्यायिका 1/1/16

**गात्राणां वायुनिमित्तमिति।**[149] यदा अकारादीनामुच्चारणे कण्ठादीनीमुर्ध्वभागात् प्रारभ्य करणं क्रमशः अधोभागमायाति तदा स स्वरितसंज्ञो भवति।

एवंविधोपायेन *चतुरध्यायिकायां* ये उदात्तानुदात्तस्वरिताः विहिताः माण्डूकीशिक्षानुसारं तेषामुदात्तादीनामपि उदात्तादयो नास्ति।

## शिक्षान्तरेषु तथा प्रातिशाख्येषूदात्तादिस्वरः

माण्डूकीशिक्षायामुदात्तानुदात्तस्वरितप्रचयाश्चत्वारः स्वराः प्रतिपादिताः। प्रायेण बहुष्वेव शिक्षाग्रन्थेषु उदात्तादयश्चत्वार एव स्वराः स्वीकृताः। ऋग्वेदप्रातिशाख्यग्रन्थे प्रथमं त्रिविधं स्वरमङ्गीकृत्य तेषां लक्षणं प्रदत्तम्। ततः स्वरितभेदालोचनादनन्तरं तत्र प्रचयस्योल्लेखः कृतः शौनकाचार्येण -

**उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः।**

**आयामविश्रम्भाक्षेपैस्त उच्यन्ते।**[150] इति।

**स्वरितादनुदात्तानां परेषां प्रचयः स्वरः।**

**उदात्तश्रुतितां यान्त्येकं द्वे वा बहुनि वा॥**[151] इति च।

*वर्णरत्नप्रदीपिकाशिक्षायां* तु प्रचयः स्वरो नाङ्गीकृतः। तत्र उदात्तादीनां लक्षणप्रसङ्गे उच्यते-

---

149 ऋग्वेदप्रातिशाख्यस्य 3/1 उवटभाष्यम्

150 ऋग्वेदप्रातिशाख्यम् 3/1

151 ऋग्वेदप्रातिशाख्यम् 3/19

**वर्णेषूच्चार्यमाणेषु विकाराः स्युस्त्रयस्तनोः।**

**आयाममार्दवौ चोभौ  तृतीयश्चाभिघातकः॥**

**गात्रस्योच्चमधस्तिर्यग्गमनं स्याद्यतः क्रमात्।**

**तच्चोदात्तेऽनुदात्ते च स्वरिते च प्रकीर्तितम् ॥**[152] इति।

अर्थात् स्वरोच्चारणे गात्रस्य आयाममार्दवाभिघातकाः त्रिविधा विकारा दृश्यन्ते। आयामो नाम वायुनिमित्तमुर्ध्वगमनं गात्रस्य। तेन च वायुना उच्चार्यमाणः स्वर उदात्तः। मार्दवं नाम गात्रस्य वायुनिमित्तमधोगमनम्। चेन च वायुना उच्चार्यमाणः स्र अनुदात्तः। अभिघातको नाम तिर्यग्गमनं गात्रस्य वायुनिमित्तम्। तेन च उच्चार्यमाणः स्वरः स्वरितः।

व्यासशिक्षायामुदात्तादीनां लक्षणप्रसङ्गे उच्यते-

**उदात्तोच्चारणे तस्य देहदैर्घ्यं भवेद् यतः।**

**उच्चारणेऽनुदात्तस्य देहस्य ह्रस्वता भवेत्।**

**भवेत्तत्र समाहातः स्वरितश्चोच्चनीचयोः।**[153] इति।

वर्णरत्नप्रदीपिकाशिक्षावदत्रापि उदात्तनुदात्तयोर्लक्षणं प्रदर्शितम्। परन्तु स्वरितलक्षणेऽत्र विशिष्टत्वं दृश्यते। अत्र स्वरिलक्षणे समाहारशब्दः प्रयुक्तः यः पाणिनीयव्याकरणे स्वरितलक्षणे प्रयुक्तः। उच्चनीचयोर्नाम उदात्तानुदात्तयोः समाहारः स्वरित इति।

नारदीयशिक्षायामुदात्तादिस्वरः पञ्चविधः प्रतिपादितः। तत्रोक्तम्-

---

[152] वर्णरत्नप्रदिपीकाशिक्षा 8-9

[153] व्यासशिक्षा 288-290

**उदात्तश्चानुदात्तश्च स्वरितप्रचिते तथा।**

**निघातश्चेति विज्ञेयः स्वरभेदस्तु पञ्चधा॥**[154] इति।

अर्थात् उदात्तः अनुदात्तः स्वरितः प्रचितः निघात इति पञ्चमः। यद्यपि वृत्तिकारेण भट्टशोभाकरेण उच्यते यत् अत्र निघातस्तु स्वरित एव। प्रचये परतः स्थिते स्वरितस्याहननात् तस्य स्वरितस्य निघाताख्या।

पाणिनीयव्याकरणे त्रिविधस्य स्वरस्य साक्षात् सूत्रेण लक्षणं प्रदत्तम् **उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारः स्वरितः**[155] इति। अर्थात् ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञकः। ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तसंज्ञकः। उदात्तानुदात्तयोः समाहारः यत्र भवति स समाहारः इति। ततश्च **स्वरितात् संहितायामनुदात्तानम्**[156] इति सूत्रेण एकश्रुतिः विहिता। अर्थात् स्वरितात् परे विद्यमानाः अनुदात्ताः प्रचयसंज्ञकाः स्युः। प्रचयस्यैव नामान्तरमेकश्रुतिः। ततः **उच्चैस्तरां वा वषट्कारः**[157] इति सूत्रेण उदात्ततरनामो भिन्नः स्वरः प्रतिपादितः। ततश्च - **उदात्तस्वरितपरस्य सन्नतरः**[158] इति सूत्रेण सन्नतरः अनुदात्ततरो वा इति पृथक्स्वरः प्रतिपादितः। एवं कृत्वा पाणिन्यनुमतः स्वरः षड्विधः इति विज्ञेयः।

---

[154] नारदीयशिक्षा 1/7/19

[155] अष्टाध्यायी 1/2/29-31

[156] अष्टाध्यायी 1/2/39

[157] अष्टाध्यायी 1/2/34

[158] अष्टाध्यायी 1/2/40

परन्तु पाणिनीयव्याकरणस्य भाष्यकृता पतञ्जलिना इतोऽपि अतिरिक्तः सप्तमः स्वरः स्वीकृतः। स च स्वरः स्वरिते विशिष्ट उदात्तः। महाभाष्यकृतोच्यते – **उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः, स्वरिते य उदात्तः सोऽन्येन विशिष्टः, एकश्रुतिरिति सप्तमः।**

अतो दृश्यते यत् पाणिनीयव्याकरणनये स्वराः सप्त, परन्तु माण्डूकीशिक्षानुसारं स्वराः चत्वार एव। माण्डूकीशिक्षायाम् उदात्ततरः, अनुदात्ततरः, स्वरिते अन्येन विशिष्ट उदात्तः इति त्रयः स्वराः न स्वीकृताः। *माण्डूकीशिक्षायां* स्पष्टं घोषितं यद् उदात्ताद् उदात्तरम्, अनुदात्तादनुदात्ततरं तथा स्वरितात् स्वरिततरः नास्ति -

**उच्चादुच्चतरन्नास्ति नीचान्नीचतरं कुतः।**

**स्वरितात् स्वरितन्नास्ति कम्पिताच्चैव कम्पितम्।।**[159] इति।

किञ्च न केवलं *माण्डूकीशिक्षायाम्* अन्यत्र बहुष्वेव शिक्षाग्रन्थेषु एते उदात्ततरादयो न स्वीकृताः। पाणिनीयव्याकरणेन सह माण्डूकीशिक्षायाः अपरमेकं वैसादृश्यं यत् – **एकादेशः उदात्तेनोदात्तः**[160] इति सूत्रानुसारेण उदात्तेन सह अनुदात्तस्य य एकादेशः स उदात्तो विहितः, परन्तु माण्डूकीशिक्षायामुच्यते यद् उदात्तेन सहानुदात्तस्य एकादेशः अनुदात्तः स्यात्। तत्रोच्यते-

**द्वयोस्तु स्वरयोः सन्धावेकीभावो यदा भवेत्।**

**उदात्तोऽथानुदात्तस्य वंशं गच्छति सन्धिषु।।**[161] इति।

---

[159] माण्डूकीशिक्षा 5/2

[160] अष्टाध्यायी 8/2/5

[161] माण्डूकीशिक्षा 6/2

यथा **अग्निमीले पुरोहितम्..** इति ऋग्वेदीयप्रथममन्त्रे अग्निमिति पदे अगिधातोः नि-प्रत्यये **धातोः**[162] सूत्रेण  अकारस्योदात्तत्वे **आद्युदात्तश्**[163] सूत्रेण नि-प्रत्ययस्य इकारस्योदात्तत्वे प्राप्ते अतिशिष्टत्वाद् इकारस्योदात्तः शिष्यते। ततः अम्-विभक्तौ अग्नि+अम् इति स्थिते अमः अकारः अनुदात्तः **अनुदात्तौ सुप्-पितौ**[164] इत्यनेन। **अमि पूर्वः**[165] इति सूत्रेण पूर्वरूपैकादेशे **अग्निम्** इति जाते पाणिनिनये इकारः उदात्तः। परन्तु माण्डूकीशिक्षानुसारम् अयमिकारः अनुदात्त एव। अत्रैव द्वयोर्विरोधः। माण्डूकीशिक्षायाम् उदात्तानुदात्तयोरेकादेशः अनुदात्तः इति यो विशेषः प्रतिपादितः स तु अथर्ववेदे उपलभ्यते इति वक्तुं शक्यते माण्डूकीशिक्षायाः अथर्ववेदान्तःपातित्वात्। उदात्तानुदात्तयोरेकादेशः अनुदात्तः इति माण्डूकीशिक्षानुमतनियमस्य विरुद्धं मतम् अथर्ववेदप्रातिशाख्येऽपि उपलभ्यते। अथर्ववेदप्रातिशाख्ये सूत्रं सूत्रितम् – **अवर्णमध्यः अकारः एकादेशे विशेषः**[166] इति। अत्र विशेषो नाम उदात्तानुदात्तयोरेकादेशः उदात्तः एव। अथर्ववेदीयचतुरध्यायिकायामपि उदात्तानुदात्तयोरेकादेशः उदात्तः  एव प्रतिपादितः – **एकादेश उदात्तेनोदात्तः**[167] इति। किञ्च अथर्ववेदसंहितायां बहुत्रैव उदात्तानुदात्तयोरेकादेशः उदात्तः एव दृश्यते।

---

[162] अष्टाध्यायी 6/1/162

[163] अष्टाध्यायी 3/1/3

[164] अष्टाध्यायी 3/1/4

[165] अष्टाध्यायी 6/1/107

[166] अथर्ववेदप्रातिशाख्यम् 1/1/6

[167] चतुरध्यायिका 3/3/22

## माण्डूकीशिक्षानुमताः षड्जादिस्वरास्तेषामुदात्तादिष्वन्तर्भावश्च

स्वरशब्देन यथा उदात्तादयो बुध्यन्ते तथा सामवेदे प्रसिद्धाः षड्जादयः स्वरा अपि ज्ञायन्ते। यद्यपि षड्जादयः सामवेदे एव सामगानावसरे उपलभ्यन्ते परन्तु प्रायेण सर्ववेदीयासु शिक्षास्वेव षड्जादीनामालोचनं प्राप्यते। माण्डूकीशिक्षायामपि सम्यगालोचिता वर्तन्ते। एते षड्जादयः स्वराः सप्त। तत्रोच्यते –

**षड्जऋषभगान्धारो मध्यमः पञ्चमस्तथा।**

**धैवतश्च निषादश्च स्वराः सप्तेह सामसु॥**[168] इति।

एतैः षड्जादिभिः स्वरैः के प्राणिनः शब्दायमानाः दृश्यन्ते तदप्यत्र सम्यक् प्रतिपादितम्। यथा- षड्जे वदति मयूरो गावो रम्भान्ति चर्षभे..[169].इत्यादयः। उरःप्रभृतिभ्यः कस्मात् स्थानाच्चैषामुच्चारणं भवति तदप्यत्र यथार्थतया प्रतिपादितम्। तेषां शुक्तादिवर्णः, करतलगताङ्गुलिषु षड्जादीनां स्थानञ्च तत्र प्रतिपादितम्। एतेषां षड्जादीनाम् उच्चारणस्थानादिकं सर्वं मयैकेन कोष्ठकचित्रेण प्रदर्श्यते।

---

[168] माण्डूकीशिक्षा 1/8

[169] माण्डूकीशिक्षा 1/9

| **स्वरनाम** | **शब्दायमानो जीवः** | **उच्चारणस्थानम्** | **वर्णः** | **करतलगतस्थानम्** |
|---|---|---|---|---|
| षड्जः | मयूरः | कण्ठः | पद्मपत्रप्रभः | अनामिका |
| ऋषभः | गौः | शिरः | शुकपिञ्जर/पीतः | वाह्याङ्गुष्ठः |
| गान्धारः | अजः | नासिका | कणकाभः | प्रादेशनी |
| मध्यमः | क्रौञ्चः | उरः | कुन्दसप्रभवः | अङ्गुष्ठः |
| पञ्चमः | कोकिलः | उरस्शिरःकण्ठाः | कृष्णः | मध्यमा |
| धैवतः | अश्वः | ललाटः | पीतः | कनिष्ठा |
| निषादः | कुञ्जरः | सर्वाण्युच्चारणस्थानानि | सर्वे वर्णाः | कनिष्ठायाः अधः |

षड्जादीनामेवं वर्णनं शिक्षान्तरेष्वपि उपलभ्यते। एतानि विहाय नारदीयशिक्षायामेतेषां ब्राह्मणादिजातिरपि निर्दिष्टा –

**पञ्चमो मध्यमः षड्ज इत्येते ब्राह्मणाः स्मृताः।**

**ऋषभो धैवतश्चापि इत्येतौ क्षत्रियावुभौ॥**

**गान्धारश्च निषादश्च वैश्यावर्धेन वै स्मृतौ॥**[170] इति।

किञ्च नारदीयशिक्षायामेतेषामुच्चारणस्थाननिर्देशावसरे उच्चारणपद्धतिरपि उक्ता।

माण्डूकीशिक्षायामेतेषां षड्जादीनामुच्चारणस्थाननिर्देशावसरे धैवतस्वरस्य उच्चारणस्थानं ललाटमिति निर्दिष्टम्, परन्तु वर्णानामुच्चारणस्थानालोचनावसरे माण्डूकीशिक्षायां

[170] नारदीयशिक्षा 1/4/3-4

यानि स्थानान्युक्तानि तेषु ललाटस्य अन्तर्भावो नास्ति। किञ्च वर्णोच्चारणस्थानरूपेण ललाटस्य ग्रहणमन्यत्रापि न दृश्यते।

माण्डूकीशिक्षानुसारं षड्जादिषु सप्तसु स्वरेषु षड्ज-ऋषभ-धैवतनिषादाः एते चत्वारः स्वराः छन्दसि वर्तमानाः सन्ति। गान्धारमध्यमपञ्चमाः ऋगादिवेदे न उपलभ्यन्ते। तत्रोच्यते-

**प्रथमावन्तिमौ चैव वर्तन्ते छन्दसि स्वराः।**

**त्रयो मध्या निवर्तन्ते मण्डूकस्य मतं यथा॥**[171] इति।

माण्डूकीशिक्षायामुदात्तादिस्वराः चत्वार एव स्वीरकृताः उदात्तानुदात्तस्वरितप्रचयाः इति। षड्जादीनां चत्वारः एव मूण्डकाचार्येण स्वीकृताः। षड्ज-ऋषभ-धैवत-निषादानां चतुर्णामुदात्तादिषु अन्तर्भावः प्रदर्शितः मण्डूकाचार्येण । तत्रोच्यते-

**द्वितीयं स्वरितं प्राहुः षष्ठः प्रचित उच्यते।**

**उच्चं विद्यान्निषादं तु नीचं षड्जमुदाहृतम्॥**[172] **इति।**

**षड्ज-ऋषभ-गान्धारो मध्यमः पञ्चमस्तथा।**

**धैवतश्चेति निषादश्च स्वराः सप्तेह सामसु ॥''**[173]

---

[171] माण्डूकीशिक्षा 2/3

[172] माण्डूकीशिक्षा 2/4

[173] माण्डूकीशिक्षा 1/8

इति प्रतिज्ञानुसारं द्वितीयं नाम ऋषभस्वरः। द्वितीयं स्वरितं प्राहुर्नाम ऋषभस्य स्वरिते अन्तर्भावः। एवं षष्ठः प्रचितो नाम धैवतस्य प्रचयेऽन्तर्भावः, निषादस्य उदात्ते अन्तर्भावः, षड्जस्य अनुदात्ते अन्तर्भावः स्वीकृतः माण्डूकीशिक्षायाम्।

**माण्डूकीशिक्षानुमतः स्वरितविभागविचारः**

उदात्तादित्रिविधेषु स्वरेषु स्वरितोऽन्यतमः। उदात्तात् परे विद्यमानस्यानुदात्तस्य स्वरितत्वं जायते उदात्तादनुदात्तस्य स्वरितः इति पाणिनीयसूत्रेण। स च माण्डूकीशिक्षायाम् यदुदात्तमुदात्तं तद्यत्स्वरितं तत्पदे भवति नीचम्[174] इति श्लोकेन प्रतिपादितः। सर्वदा तु उदात्तपरस्यानुदात्तस्य एव स्वरितत्वं न भवति क्वचित् स्वतन्त्ररूपेणैव स्वरितस्वरो दृश्यते। यथा **तित् स्वरितमि**त्यादिना जातः स्वरितः स्वतन्त्रः एव। स्वरितस्वरस्य विविधो भेदः शिक्षाग्रन्थेषु परिलक्ष्यते। माण्डूकीशिक्षायां प्रथमं स्वरितस्वरस्य सप्त भेदः स्वीकृतः। तत्रोच्यते –

**सप्तस्वरान् प्रवक्ष्यामि तेषाञ्चैव बलाबलम्।**

**लक्षणानि च सर्वेषां युक्तस्तानि निबोध मे॥** [175] इति

यद्यपि श्लोकेऽस्मिन् सप्तस्वरान् प्रवक्ष्यामि इत्युक्तं न तु सप्त स्वरितानिति तथापि परवर्तिषु श्लोकेषु स्वरितभेदनामानि दृष्ट्वा एतत् ज्ञायते यत् स्वरित एव प्रतिज्ञातः, यतः जात्यादिनामानि स्वरितभेदे एव सर्वत्र प्रसिद्धानि। अपि चात्र आचार्येण प्रतिज्ञातं यत् तेषां लक्षणमपि तेन वक्ष्यते इति। प्रतिज्ञानुसारमाचार्येण सप्तभेदस्वीकारादनन्तरं तेषां नामान्यप्युक्तानि –

---

174 माण्डूकीशिक्षा 5/3

175 माण्डूकीशिक्षा 7/1

**अभिनिहितः प्राक्श्लिष्टो जात्यः क्षैप्रश्च पादवृत्तश्च।**

**तैरोव्यञ्जनः षष्ठस्तिरोविरामश्च सप्तमः॥**[176] इति।

अतः सप्त स्वरिताः हि अभिनिहितः, प्राक्श्लिष्टः (प्राश्लिष्ट इति पाठभेदः), जात्यः, क्षैप्रः. पादवृत्तः, तैरोव्यञ्जनः, तिरोविरामश्च।

प्रथमस्य तथा अभिनिहितस्य लक्षणमुच्यते माण्डूकीशिक्षायाम् –

**ए ओ आभ्यामुदात्ताभ्यामकारो रेफितश्च यः।**

**अकारं यत्र लुम्पन्ति तमभिनिहितं विदुः॥**[177] इति।

अर्थात् एकारान्तस्य ओकारान्तस्य च उदात्तस्य परे अकाररेफितयोः विद्यमानावस्थायां सन्धावेकीभावे एङः पदान्तादति इति पाणिनीयसूत्रेण पूर्वरूपैकादेशे स्वरितो वानुदात्ते पदादौ इति सूत्रेण यः स्वरितो भवति सः अभिनिहितस्वरितः। अथर्ववेदसंहितायामस्य स्वरितस्योदाहरणं यथा –

**तेऽवदन् प्रथमा ब्रह्मकिल्विषेऽकूपारः सलिलो मातरिश्वा...**[178]

इति मन्त्रगतं तेऽवदन्निति पदम् ते इत्यस्य तकारोत्तरः एकारः उदात्तः अकारश्च अनुदात्तः[179] तयोः पूर्वरूपैकादेशे पूर्वस्थः तकारोत्तरः एकारः स्वरितो भवति। स च अभिनिहितस्वरितः।

द्वितीयस्वरितविभागस्य तथा प्राक्श्लिष्टस्य लक्षणमुच्यते तत्र-

---

176 माण्डूकीशिक्षा 7/2

177 माण्डूकीशिक्षा 7/3

178 अथर्ववेदसंहिता (शौनकीय) 5/17/1

179 अत्र ते इति पदं तत्प्रातिपदिकस्य पुंसि प्रथमाबहुवचनान्तम्। फिषोऽन्तोदात्तः इति फिट्सूत्रेण अन्तोदात्तात् परम् अनुदात्तौ सुप्पितौ इति सूत्रेण अनुदात्तेन विभक्त्या सहैकादेशे उदात्तो भवति ते इति पदम्। अवदन् इत्यत्र अकारः क्रियापदत्वादनुदात्तः।

**इकारं यत्र पश्येयुरिकारेणैव संयुतम्।**

**उदात्तोऽप्यनुदात्तस्य प्राक्श्लिष्टोऽभीन्धतामपि॥**[180] इति।

अर्थात् पूर्वावस्थितेन उदात्तेन इकारेण यदा परावस्थितस्य अनुदात्तस्य इकारस्य अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घादेशो भवति तदा उदात्तानुदात्तयोर्मेलने यः स्वरितो जायते स प्राक्श्लिष्टस्वरितः। अथर्ववेदीयायां चतुरध्यायिकायामुच्यते – **इकारयोः प्राश्लिष्टः**[181] इति। अथर्ववेदे अस्योदाहरणं यथा -

**तनूष्टे वाजिन् तन्वं नयन्ती वाममस्मभ्यं धावतु शर्म तुभ्यम्।**

**अह्रुतो महो धरुणाय देवो दिवीव ज्योतिः स्वमा मिमीयात्॥**[182]

इति मन्त्रगतं दिवीव इति पदम्। अत्र दिवि इव इति पदद्वयमस्ति। दिवि इत्यत्र वकारोत्तरः इकारः उदात्तः। इव इत्यस्य इकारश्च अनुदात्तः।[183] तयोरेकदेशे दिवीव इत्यत्र वकारोत्तरः ईकारः स्वरितः। स च प्राक्श्लिष्टः स्वरितः।

तृतीयस्य तथा जात्यस्वरितस्य लक्षणप्रसङ्गे मण्डूकाचार्येणोच्यते-

---

[180] माण्डूकीशिक्षा 7/4

[181] चतुरध्यायिका 3/3/12

[182] अथर्ववेदसंहिता (शौनकीय) 6/92/3

[183] अत्र दिवि इति पदं दिव्-प्रातिपदिकस्य सप्तम्येकवचनान्तं पदम्। दिव् इति फिषोऽन्त उदात्तः इति प्रातिपदिकस्वरेण अन्तोदात्तः , ततश्च ङिविभक्तेः इकारः उडिदंपदाद्यप्पुम्रैद्युभ्यः इति सूत्रेण असर्वनामस्थानविभक्तित्वात् उदात्तः। विभक्तेः एव उदात्तः अवशिष्यते सतिशिष्टत्वात्। इवशब्दस्य चादिगणे पाठत्वात् चादयोऽनुदात्ताः इत्यनेन सर्वानुदात्तत्वम्।

**सयकारं समं[184] वाप्यक्षरं स्वरितं भवेत्।**

**न चोदात्तं पुरस्तात् स्याज्जात्यः स्वर्दूत्य एव तु॥**[185] इति।

जात्यस्वरितः एक एव स्वतन्त्रस्वरितः। साधारणतया उदात्तात् परस्यानुदात्तस्य स्वरितत्वं भवति, परन्तु जात्यस्तु स्वतन्त्रः। ऋक्प्रातिशाख्यस्य भाष्यकृता उवटाचार्येण उच्यते – **जात्या स्वरूपेणैवोदात्तानुदात्तसंगतिं विना जातो जात्यः।**[186] इति। अयं स्वरितः सर्वदा यकारेण सह वकारेण सह (पाठान्तरं स्वीकृत्य) वा विद्यते। अयं स्वरितः उदात्तपूर्वो न भवति। चतुरध्यायिकायामस्य लक्षणप्रसङ्गे उच्यते – **अनुदात्तपूर्वात् संयोगाद्यवान्तात् स्वरितं परमपूर्वं वा जात्यः**[187] इति। अथर्ववेदसंहितायामस्य स्वरितस्योदाहरणं यथा –

**यदन्तरं तद्बाह्यं यद्बाह्यं तदन्तरम्।**

**कन्यानां विश्वरूपाणां मनो गृभायौषधे॥**[188]

इति मन्त्रे कन्यानामित्यत्र आकारः स्वरितः। तत्र भाष्येऽपि सायणाचार्येणोक्तम् – **तिल्यशिक्यमर्त्यकाष्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः**[189] इति अन्तःस्वरितम्। इति। कन्यानामित्यत्र न्यकारोत्तरः आकारः स्वरितः। स च स्वत एव सूत्रेण जातः, न तु उदात्तात् परं विद्यमानत्वात् तस्यानुदात्तत्वं जातम् अतोऽयं जात्यस्वरितः।

चतुर्थस्य तथा क्षैप्रस्य लक्षणप्रसङ्गे माण्डूकीशिक्षायामुच्यते –

---

[184] सवमिति पाठान्तरः

[185] माण्डूकीशिक्षा 7/5

[186] ऋग्वेदप्रातिशाख्यस्य उवटभाष्यम् 3/8

[187] चतुरध्यायिका 3/3/13

[188] अथर्ववेदसंहिता (शौनकीय) 2/30/4

[189] फिट्सूत्रम् 4/8

**इउवर्णौ यदोदात्तावापद्येत यवौ क्वचित्।**

**अनुदात्तप्रत्यये स्याद्विद्धि क्षैप्रस्य लक्षणम्॥**[190] इति।

अर्थात् उदात्तयोः इकार-उकारयोः स्थाने यदा यकारवकारौ विधीयते तदा तयोः उदात्तयोः यकारवकारयोः परं पदादौ विद्यमानस्य अनुदात्तस्य - **उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य**[191] इत्यनेन सूत्रेण यः स्वरितो विधीयते सः स्वरित एव क्षैप्रस्वरितः। चतुरध्यायिकायां क्षैप्रलक्षणमुच्यते – **अन्तःस्थापत्तावुदात्तस्यानुदात्ते क्षैप्रः**[192] **इति।** अर्थात् अनुदात्ते परे सति पूर्ववर्तिनः उदात्तस्य यदा अन्तःस्थत्वं विधीयते तदा तत्परस्यानुदात्तस्य यः स्वरितो भवति स क्षैप्रस्वरितः। *अथर्ववेदे* क्षैप्रस्वरितस्योदाहरणं यथा –

**अभ्यर्चत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्तः।**[193]

इति मन्त्रगतम् अभ्यर्चत इति पदम्। अभि इत्यस्य भकारोत्तरः इकारः उदात्तः।[194] अर्चत इति तिङन्तत्वात् सर्वानुदात्तः।[195] **इको यणचि**[196] इति सूत्रेण इकारस्य यकारादेशे संयोगे च अभ्यर्चत इति पदं सिद्ध्यति। इकारारकारयोः यादेशे यकारोत्तरः अकारः स्वरितो भवति। स स्वरितश्च क्षैप्रस्वरितः।

क्षैप्रादनन्तरं पादवृत्तस्वरितलक्षणप्रसङ्गे मूण्डकाचार्येणोच्यते –

---

190 माण्डूकीशिक्षा 7/6

191 अष्टाध्यायी 8/2/4

192 चतुरध्यायिका 3/3/14

193 अथर्ववेदसंहिता (शौनकीय) 7/82/1

194 उपसर्गाश्चाभिवर्जम् इति सूत्रेण

195 तिङ्ङतिङः इति सूत्रेण

196 अष्टाध्यायी 6/1/77

**स्वरिते स्वरितं यत्र विवृत्या यत्र संहिताः।**

**तं पादवृत्तं जानीयात्ते त्वस्मिन्यवमादधुः॥** इति।[197]

विवृतिपदस्यार्थो हि द्वयोः स्वरयोः मध्ये व्यञ्जनाभावेऽपि सन्ध्यभावः। *ऋग्वेदप्रातिशाख्ये* उच्यते – **स्वरान्तरं विवृत्तिः** इति। अस्यार्थप्रसङ्गेन भाष्यकृता उवटेनोच्यते – **अस्यामेव संहितायां यत् स्वरयोः अन्तरं वक्ष्यति तत् विवृत्तिसंज्ञं स्यात्** इति।[198] यदा द्वयोः व्यञ्जनाव्यवहितयोः स्वरयोर्मध्ये विवृतिः दृश्यते तदा यदि पूर्वस्वरवर्णः उदात्तः परश्चानुदात्तः स्यात् तर्हि उदात्तादनुदात्तस्य स्वरितः इत्यनेन यः स्वरितो भवति स पादवृत्तस्वरितः। चतुरध्यायिकायामपि एतदेवोच्यते – **विवृत्तौ पादवृत्तः**[199] इति। अथर्ववेदसंहितायां पादवृत्तस्वरितस्योदाहरणं यथा –

**याः कृत्या आङ्गिरसीर्याः कृत्या आसुरीर्याः कृत्याः स्वयं कृता या उ चान्येभिराभृताः।**[200]

इति मन्त्रे या उ इत्यत्र विवृत्यां सत्यां यकारोत्तरात् उदात्तादुकारात् परस्य अनुदात्तस्य उकारस्य[201] स्वरितत्वं जायते। स च स्वरितः पादवृत्तसंज्ञकः।

तैरोव्यञ्जनस्य लक्षणप्रसङ्गे माण्डूकीशिक्षायामुच्यते –

**उदात्तपूर्वे सार्द्धे तु द्वितीये अक्षरे तु यः।**

---

197 माण्डूकीशिक्षा 7/7

198 ऋग्वेदप्रातिशाख्यस्य उवटभाष्यम् 2/3

199 चतुरध्यायिका 3/3/19

200 अथर्ववेदसंहिता (शौनकीय) 8/5/9

201 अत्र या इति पदं यत्प्रातिपदिकात् निष्पन्नम्। फिषोऽन्त उदात्त इति फिट्सूत्रेण अन्तोदात्तं च। तस्मात् परम् अनुदात्तौ सुप्पितौ(अ. सू. 3/1/4) इत्यनेन अनुदात्तेन विभक्त्या सहैकादेशे उदात्तत्वधर्मविशिष्टं भवति या इति पदम्। उ इति चादिगणे पाठात् चादयोऽनुदात्तः इत्यनेनानुदात्तः।

**तैरोव्यञ्जन इत्येषः सारः स्याद्दधिमध्विति॥**[202] इति।

स्वरविधौ सर्वदा व्यञ्जनम् अविद्यमानवत् भवति व्यञ्जनानामुदात्तादिधर्मरहितत्वात्। अतो यदा उदात्तस्य स्वरस्य परं व्यञ्जनव्यवहितः अनुदात्तस्वरः विद्यते तदा उदात्तादनुदात्तस्य स्वरितः इति सूत्रेण जातः स्वरितः तैरोव्यञ्जननाम्ना व्यवह्रीयन्ते। व्यञ्जनेन व्यवहितत्वात् अस्य एतादृशी आख्या। चतुरध्यायिकायामुच्यते – **व्यञ्जनव्यवेतस्तैरोव्यञ्जनः**[203] **इति**। ऋग्वेदप्रातिशाख्यानुसारम् उदात्ते स्वरिते वा परं न विद्यमाने सति उदात्तात् परः व्यञ्जनव्यवहितः अनुदात्तः स्वरितो भवति। स च तैरोव्यञ्जनः। उच्यते च शौनकाचार्येण –

**उदात्तपूर्वं नियतं विवृत्त्या व्यञ्जनेन वा।**

**स्वर्यतेऽन्तर्हितं न चेदुदात्तस्वरितोदयम्॥**[204] इति।

तैरोव्यञ्जनस्वरितस्य अथर्ववेदसंहितायामुदाहरणं यथा –

**ये त्रिषप्ताः परियन्ति विश्वा रूपाणि विभ्रतः**[205]

इति मन्त्रे विश्वा इति पदे वकारोत्तरः इकारः उदात्तः परवर्तिश्वकारोत्तरः आकारः अनुदात्तः।[206] श्-कारव-काराभ्यां व्यवहितोऽपि उदात्तादनुदात्तस्य स्वरितः इत्यनेन आकारः स्वरितो भवति। अयं स्वरितः तैरोव्यञ्जनस्वरितः।

तिरोविरामस्वरितलक्षणप्रसङ्गे माण्डूकीशिक्षायामुच्यते-

---

202 माण्डूकीशिक्षा 7/8

203 चतुरध्यायिका 3/3/18

204 ऋग्वेदप्रातिशाख्यम् 3/17

205 अथर्ववेदसंहिता (शौनकीय) 1/1/1

206 विश्वशब्दः अश्रुप्रूषिलटिकणिखटिविशिभ्यः क्वन् (उणादिसूत्रम् 1/151) इति सूत्रेण क्वन्प्रत्ययान्तत्वात् ञ्नित्यादिर्नित्यम् ( अ. सू.6/1/197) इति सूत्रेण आद्युदात्तः। अनुदात्तं पदमेकवर्जम् (6/1/158) इति सूत्रेण आकारः अनुदात्तः।

**अवग्रहात् परं यत्र स्वरितं स्यादनन्तरम्।**

**तिरोविरामं जानीयात् प्रजापतेर्निदर्शनम्॥**[207] इति।

अयं स्वरितः पदपाठविषयकः। संहितायाः समासबद्धपदं पदपाठे अवग्रहचिह्नेन पृथक्क्रियते। एवमवस्थायाम् अन्तोदात्तात् पूर्वपदात् अवग्रहव्यवहिते आद्यनुदात्ते उत्तरपदे सति उदात्तादनुदात्तस्य स्वरितः इति सूत्रेण यदा सोऽनुदात्तः स्वरितो भवति तदा स स्वरितः तिरोविरामसंज्ञकः। अवग्रहेऽर्द्धमात्रं स्यादित्यादि माण्डूकीशिक्षावचनानुसारम् अवग्रहः अर्द्धमात्राकालविशिष्टः। अर्द्धमात्राविशिष्टविरामव्यवहितत्वादेवास्य तिरोविरामाख्या। चतुरध्यायिकायाम् अयं स्वरितः अवग्रहस्वरितनाम्ना व्यपदिश्यते। तत्रोच्यते- **अवग्रहे सविधः**[208] इति। अथर्ववेदसंहितायामस्य स्वरितस्योदाहरणं यथा –

**यदान्त्रेषु गवीन्योर्यद्वस्तावधि संश्रितम्**[209]

इति मन्त्रे संश्रितमिति पदम्। पदमिदं पदपाठकाले सम्ऽश्रितम् इत्येवं प्रकारेण अवग्रहेण पृथक्कर्तव्यम्। अत्र सकारोत्तरस्य उदात्तस्य अकारस्य परम् अवग्रहव्यवधानेऽपि इकारः स्वरितो भवति। स च तिरोविरामस्वरितः। मण्डूकाचार्येण स्वयमपि अस्योदाहरणं प्रदत्तं **प्रजापतेः** इति। प्रजानां पतिः इति प्रजापतिः। षष्ठीसमासत्वात् पदपाठकाले प्रजाऽपति एवं पृथक्कर्तव्यम्। पूर्वपदे जकारोत्तरोदात्ताद् आकारात् अवग्रहव्यवहितः पकारोत्तरः अनुदात्तः अकारः स्वरितो भवति।[210] स च तिरोविरामः।

---

[207] माण्डूकीशिक्षा 7/9

[208] चतुरध्यायिका 3/3/20

[209] अथर्ववेदसंहिता (शौनकीय) 1/3/6

[210] प्रपूर्वकात् जन्-धातोः उपसर्गे च संज्ञायाम् (अ. सू. 3/2/99) इति सूत्रेण डप्रत्ययनिष्पन्नः प्रजशब्दः। ततः जनतार्थे अजाद्यतष्टाप् (अ. सू. 2/2/33) इति सूत्रेण टापि प्रजाशब्दनिष्पत्तिः। डप्रत्ययस्य अकारः आद्युदात्तश्च (अ. सू. 3/1/3) इत्यनेन

एवं प्रकारेण **सप्तस्वरान् प्रवक्ष्यामि...** इत्यनेन मण्डूकाचार्येण यत् प्रतिज्ञातं तत् सोदाहरणं प्रतिपादितम्। मण्डूकाचार्येण प्रथमम् अभिनिहितः, प्राक्श्लिष्टः, जात्यः, क्षैप्रः, पादवृत्तः, तैरोव्यञ्जनः, तिरोविरामः इति सप्त स्वरिताः आलोचिताः। शिक्षान्तरेषु तथा प्रातिशाख्यादिषु अष्ट स्वरितभेदाः उपलभ्यन्ते। याज्ञवल्क्यशिक्षायाम् अष्ट स्वरितविभागाः दृश्यन्ते। तत्रोच्यते-

**अष्टौ स्वरान् प्रवक्ष्यामि तेषामेव तु लक्षणम्।**

**जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथापरः॥**

**तैरोव्यञ्जनसंज्ञश्च तथा तैरोविरामकः।**

**पादवृत्तो भवेत्तद्वत् ताथाभाव्य इति स्वराः॥**[211] इति।

याज्ञवल्क्यशिक्षायां माण्डूकीशिक्षातिरिक्तः ताथाभाव्यः स्वरितः स्वीकृतः।

*माण्डूकीशिक्षायां* यद्यपि प्रतिज्ञायां ताथाभाव्यस्वरितः नाङ्गीकृतः परन्तु स्वरितविभागालोचनावसरे ताथाभाव्यस्वरितः लक्षणोदाहरणयोगेन प्रस्तुतः। तत्र मण्डूकाचार्येन ताथाभाव्यस्वरितलक्षणप्रसङ्गे उच्यते-

---

उदात्तः। टापः आकारः पित्वात् अनुदात्तौ सुप्पितौ (अ. सू. 3/1/4) इति सूत्रेण अनुदात्तः। तयोरेकादेशे आकारः उदात्तः एकादेश उदात्तेनोदात्तः (अ. सू. 8/2/5) इति सूत्रेण। किञ्च कुगतिप्रादयः (अ. सू. 2/2/18) इत्यादिना प्रादिसमासत्वात् गतिकारकोपपदात् कृत् (अ. सू. 6/2/139) इति सूत्रेण प्रजाशब्दस्य उत्तरपदप्रकृतिस्वरः अत्र श्रुतः। ततश्च प्रजायाः पतिः इति षष्ठीसमासत्वात् पत्यावैश्वर्ये (6/2/18) इति सूत्रेण तत्पुरुषे पूर्वपदप्रकृतिस्वरः भवति। तेन जकारोत्तरः आकारः उदात्तः एव तिष्ठति समासात् परमपि।

[211] याज्ञवल्क्यशिक्षा 66-67

**द्वयोरुदात्तयोर्मध्ये नीचो यस्स्यादवग्रहः।**

**ताथाभाव्यो भवेत्कम्पस्तनूनपान्निदर्शनम्॥**[212] इति।

अर्थात् समासबद्धपदे द्वयोः उदात्तयोः मध्ये यदा अनुदात्तः विद्यते तदा पदपाठे अवग्रहेण पृथक्करणादनन्तरं प्रथमोदात्तात् परं विद्यमानस्य अनुदात्तस्य स्वरितत्वप्राप्तिर्जायते उदात्तादनुदात्तस्य स्वरितः इति सूत्रेण परन्तु तस्य स्वरितत्वं न भवति। तदा स स्वरितभाव्यः अनुदात्तः ताथाभाव्यसंज्ञको भवति। ताथाभाव्यस्वरितस्योदाहरणं मण्डूकाचार्येण स्वयं प्रदत्तं तनूनपात् इति।पदमिदं पदपाठे तनूऽनपात् इत्येवं प्रकारेण पृथक्करणादनन्तरं तनू इत्यस्य तकारोत्तरात् उदात्तात् अकारात् परस्थितः नकारोत्तरः अकारः अनुदात्तः। तस्य च उदात्तादनुदात्तस्य स्वरितः इति सूत्रेण स्वरितप्राप्तिः, परन्तु तत्परम् उदात्तस्य विद्यमानत्वात् अनुदात्तरूपेणैव तिष्ठति नकारोत्तरः अकारः। वस्तुतस्तु वनस्पत्यादिगणे तनूनपात्शब्दस्य पाठात् **उभे वनस्पत्यादिषु युगपत्** [213]इति सूत्रेण पदद्वये एव उदात्तः तिष्ठति।[214] अतः अयं स्वरितभाव्यः अनुदात्तः ताथाभाव्यसंज्ञकः। अपि चायं ताथाभाव्यस्वरितः कम्पस्वरितो भवति मण्डूकाचार्यमतम्।

एतेषामष्टानां स्वरितानामुच्चारणं समं न भवति। तीक्ष्णतावैधर्म्यात् एतेषामुच्चारणं भिन्नरूपेण श्रूयते। अतः कः स्वरितः कस्मात् तीक्ष्णतरः इत्यपि माण्डूकीशिक्षायां प्रतिपादितमस्ति।

---

[212] माण्डूकीशिक्षा 7/10

[213] अष्टाध्यायी 3/2/140

[214] तनु विस्तारे इति धातोः कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः (उ. सू. 81) इति सूत्रेण औणादिक-उप्रत्ययेन तनूः इति पदसिद्धिः। प्रत्ययस्वरेणात्र अन्तोदात्तत्वं प्राप्तं परन्तु वनस्पत्यादिगणे आद्युदात्तरूपेण पाठात् निफातनात् आद्युदात्तमेव भवति तनूःशब्दः। न पातयति इत्यर्थे क्विप्प्रत्ययनिष्पन्नः नपाच्छब्दः।
नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या (अ. सू. 6/3/75) इति सूत्रेण नलोपाभावः, आद्युदात्तञ्च निपातनात् सिद्धम्। अतः तनूः नपाच्चेति पदद्वयमेव आद्युदात्तत्वधर्मविशिष्टम्। तन्वाः नपात् इति विग्रहे समासो भवत्यत्र। वनस्पत्यादिगणेपाठवशात् उभे वनस्पत्यादिषु युगपत् ( अ. सू. 3/2/140) इति सूत्रानुसारं समासात् परमपि उभयपदम् आद्युदात्तत्वधर्मविशिष्टं तिष्ठति।

सर्वतीक्ष्णो भवति अभिनिहितस्वरितः, ततश्च प्राक्श्लिष्टः। प्राक्श्लिष्टात् मृदुतरौ हि जात्यक्षैप्रौ। जात्यक्षैप्राभ्यां मृदुतरो भवति तैरोव्यञ्जनः। तैरोव्यञ्जनात् मृदुतरश्च पादवृत्तस्वरितः।[215] अत्र तु मण्डूकाचार्येण ताथाभाव्यस्य तीक्ष्णता नोपदिष्टा।

शिक्षान्तरेषु तथा प्रातिशाख्यादिषु प्रायेण एवं प्रकारेणैव स्वरितविभागास्तथा तेषां लक्षणानि निरूपितानि। शिक्षान्तरेष्वपि अभिनिहितः, प्राक्श्लिष्टः, जात्यः, क्षैप्रः, पादवृत्तः, तैरोव्यञ्जनः, तिरोविरामः, ताथाभाव्यः इति अष्ट स्वरिताः आलोचिताः। कुत्रचित् एतेषां नामान्तरं दृश्यते यथा प्राक्श्लिष्टस्य स्थाने प्रश्लिष्ट इति तिरोविरामस्य स्थाने तैरोविरामः। माण्डूकीशिक्षायां यद्यपि प्रतिज्ञायां सप्त स्वरान् प्रवक्ष्यामि इत्युक्तं तथापि लक्षणनिरूपणावसरे अष्टानां स्वरितानामेव भेदाः आलोचिताः। स्वराष्टकशिक्षायां यद्यपि उदात्तानुदात्तस्वरितप्रचयभेदात् चत्वारः स्वराः स्वीकृताः परन्तु तत्र जात्यः अभिनिहितः क्षैप्रः प्रश्लिष्टः इति स्वरितस्य पञ्च एव भेदाः स्वीकृताः। तत्र तैरोव्यञ्जनः तैरोविरामः ताथाभाव्यः इति त्रयो न स्वीकृताः। तत्रोच्यते – **स्वरितः पञ्चधा। जात्याभिनिहितक्षैप्रप्रश्लिष्टभेदात्।**[216] इति।

## स्वरोच्चारणे हस्तसञ्चालनम्

उदात्तादिस्वराणां तथा षड्जादिस्वराणां मुखेन उच्चारणे कथञ्चित् सूक्ष्मम् अयाथार्थ्यम् प्रतीते हस्तसञ्चालनं दृष्ट्वा तत्स्वरं सम्यक्तया अवगन्तुं शक्यते इति कृत्वा अथवा परवर्तिनि काले परम्परानुसारेण व्यक्तिभेदेन उच्चारणभेदात् स्वरदोषे जाते जाते सति हस्तसञ्चालनं दृष्ट्वा तत्स्वरम् अवगन्तुं शक्यते इति कृत्वा वा प्राचीनैः आचार्यैः वेदपाठकाले स्वरबोधनाय

---

[215] सर्वतीक्ष्णोऽभिनिहितस्ततः प्राक्श्लिष्ट उच्यते।
ततो मृदुतरौ स्वारौ जात्यः क्षैप्रश्च तावुभौ॥
ततो मृदुतरः स्वारस्तैरोव्यञ्जन उच्यते।
पादवृत्तो मृदुतर इति स्वारबलाबलम्॥ इति (मा. शि. 8/2-3)

[216] स्वराष्टकशिक्षा 2/7

हस्तसञ्चालनमाविष्कृतम्। तस्मात् सर्वेष्वेव शिक्षाग्रन्थेषु हस्तसञ्चालनमाहात्म्यं प्रकटितमस्ति। ऋगादिचतुर्णामेव वेदानां शाखाभेदात् परम्पराभेदाच्च अध्ययनरीतिः उच्चारणप्रकारश्च भिन्नः। विविधेषु शिक्षाग्रन्थेषु परम्पराविशेषं शाखाविशेषं वा अधिकृत्य उच्चारणसमये हस्तसञ्चालनप्रकारः उपदिष्टः। रीतीनां विभिन्नत्वेऽपि सर्वैः शिक्षाकृद्भिः हस्तसञ्चालनम् अवश्यकरणीयत्वेनाङ्गीकृतम्। माण्डूकीशिक्षायामुच्यते यथार्थवेदफललाभाय अदृष्टप्राप्तये च सस्वरः तथा सहस्तसञ्चालनः वेदपाठः कर्तव्यः।[217] मण्डूकाचार्येणोच्यते यत् यदा यदा उच्चारणं भवति तदा तदा हस्तसञ्चालनमपि भवति। उच्चारणाभावे तु हस्तं न चालनीयम्। सर्वदैव हस्तेन वाणी अनुसर्तव्या – **यथा वाणी तथा पाणी रिक्तं तु परिवर्जयेत्।**

**यत्रैव तु स्थिता वाणी पाणिस्तत्रैव धार्यते॥**[218] इति।

माण्डूकीशिक्षायामुदात्तादिस्वराणामुच्चारणसमये हस्तं कुत्र स्थापनीयम् अङ्गुलयो वा कुत्र स्थापनीयाः इति नोपदिष्टं परन्तु षड्जादिस्वराणाम् अङ्गुलिषु विन्यासः प्रदर्शितः –

**वाह्याङ्गुष्ठं तु क्रुष्टं स्यादङ्गुष्ठे मध्यमः स्वरः।**

**प्रादेशिन्यां तु गान्धारो मध्यमायां तु पञ्चमः॥**

**अनामिकायां षड्जस्तु कनिष्ठायां तु धैवतः।**

**तस्याधस्तात्तु योऽन्यः स्यान्निषाद इति तं विदुः॥**[219] इति।

---

[217] स्वरश्चैव तु हस्तश्च द्वावेतौ युगपद्भवेत्।
हस्ताद् भ्रष्टः स्वराद् भ्रष्टो न वेदफलमश्नुते॥(मा. शि. 3/2)

[218] माण्डूकीशिक्षा 3/1

[219] माण्डूकीशिक्षा 2/1-2

यद्यपि माण्डूकीशिक्षायां हस्तसञ्चालनप्रकारः सम्यक्तया नोक्तः तथापि विविधेन श्लोकेन हस्तसञ्चालनमाहात्म्यप्रदर्शनत्वात् शिष्यैः स्वशाखापरम्परानुसारं हस्तसञ्चालनं शिक्षणीयमिति ज्ञेयः। माण्डूकीशिक्षायां हस्तसञ्चालनमाहात्म्यप्रकटिताः श्लोकाः यथा –

**हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्।**

**ऋग्यजुःसामभिर्दग्धो वियोनिमनुगच्छति॥**

**ऋग्यजुःसामगादीनि हस्तहीनानि यः पठेत्।**

**अनृचो ब्राह्मणस्तावद्यावत्स्वारं न विन्दति॥**

**हस्तेनाधीयमानो यः स्वरवर्णान् प्रयोजयेत्।**

**ऋग्यजुःसामभिः पूतो ब्रह्मलोकं स गच्छति॥**[220] इति।

---

[220] माण्डूकीशिक्षा 3/3-5

## उपसंहारः

लोकव्यवहारसम्पादनाय भाषा हि सर्वोत्कृष्टा पद्धतिः। भाषयैव जनाः स्पष्टतया भावप्रकाशक्षमाः भवन्ति। सा च भाषा परिवर्तनशीला। यस्यां कस्यामपि संहितायां तत्कालस्य भाषा प्रतिविम्बिताः दृश्यते। वेदो हि प्राचीनभारतीयसाहित्यस्यादिमं निदर्शनम्। चत्वारो वेदाः एकस्मिन्नेव काले ऋषिभिः न आम्नाताः। तेषु कालव्यवधानत्वात् भाषायाः विविधं परिवर्तनं परिलक्ष्यते। यथा स्वरपरिवर्तनम्, कस्यचिद् वर्णस्याभावः, कस्यचिद् वर्णस्याधिक्यम्, उच्चारणपरिवर्तनमित्यादीनि। अथर्ववेदान्तःपातित्वात् माण्डुकीशिक्षायां वर्णविषयिणी या आलोचना विहिता सा तु अथर्ववेदसम्बन्धिनीति विज्ञेयम्। माण्डूकीशिक्षायां वर्णविषयकं यदालोचनं प्राप्यते तत्र अपराभिः शिक्षाभिः किञ्चित् सादृश्यमं, किञ्चिद् वैसादृश्यं कुत्रचिद् अभिनवत्वञ्च दृश्यन्ते। पाणिनीयशिक्षायां वर्णरत्नप्रदीपिकाशिक्षायाञ्च दुस्स्पृष्टसंज्ञको वर्णः स्वीकृतः स माण्डूकीशिक्षायां न स्वीकृतः। अनेन ज्ञायते ऋग्वेदे दुस्स्पृष्टसंज्ञकवर्णस्य व्यवहारोऽस्ति परन्तु अथर्ववेदे दुस्स्पृष्टसंज्ञकवर्णस्य व्यवहारो नोपलभ्यते। वर्णालोचने माण्डूकीशिक्षायाः अपराभिः शिक्षाभिः अभिनवत्वं ह्यत्र अनुस्वारस्य त्रिविधः भेदः प्रतिपादितः।

तत्रोच्यते-

**अनुस्वारास्तु कर्तव्या ह्रस्वदीर्घप्लुतास्त्रयः।**

**अयँ राजा पशोर्मांसं क्षत्रियाणां धनूँषि च॥**[221] इति।

व्यासशिक्षायामनुस्वारः द्विविधः स्वीकृतः। तत्र वेदतैजसाख्ये व्यासशिक्षाभाष्ये उच्यते-

[221] माण्डूकीशिक्षा 8/11

**द्वावनुस्वारौ तं ध्नन्तीति केवलः।**

**स शितमित्यत्र गकारसंयुतः॥** इति।

अनुस्वारस्य ह्रस्वदीर्घप्लुतभेदेन त्रिविधे भेदे स्वीकृते सति अनुस्वारः स्वरवर्णरूपेण ग्रहणीयः। तदा माण्डूकीशिक्षानुमताः स्वराः भवन्ति पञ्चविंशतिः व्यञ्जनानि भवन्ति चत्वारिंशत्। वर्णसमाम्नाये वर्णाश्च भवन्ति पञ्चषष्टिः। प्रतीयते वर्णपटले अनुस्वारस्य व्यञ्जनत्वमेवाङ्गीकृतम्। तत्रापि पञ्चषष्टिः वर्णाः प्रतिपादिताः सन्ति। तत्रोक्तम्- **वर्णाः पञ्चषष्टिः स्वराः द्वाविंशतिः, समानाक्षराणि चतुर्दश। अष्टौ सन्ध्यक्षराण्येकोनविंशतिर्नामिनः त्रिचत्वारिंशद् व्यञ्जनानि स्पर्शाः पञ्चविंशतिः चत्वारस्त्वन्तःस्थाः चत्वारो यमाः चाष्टावुष्माणोऽयोगवाहा दश।**[222] इति।

माण्डूकीशिक्षायां वर्णविमर्शः किञ्चित् दुर्वल इति मन्यते। तत्र सन्ध्यक्षराणां समानाक्षराणां च उल्लेखो न प्राप्यते। शिक्षायामस्यां वर्णोच्चारणप्रक्रिया नोपदिष्टा। यद्यपि उरसाद्युच्चारणस्थानानि तत्रोक्तानि परन्तु केषां वर्णानां किं स्थानमिति तत्र नोक्तम्। ये विषयाः माण्डूकीशिक्षायां स्पष्टतया नोक्ताः ते तु अथर्ववेदप्रातिशाख्यात् अथर्ववेदपरिशिष्टाच्च ज्ञेयाः। वर्णविषयिणी या आलोचना माण्डूकीशिक्षायामपूर्णा सा तु वर्णपटलाख्ये अथर्ववेदपरिशिष्टे सम्यगुपलभ्यते।[223]

---

[222] वर्णपटलम् 3/6

[223] यथा केषां वर्णानां किं स्थानमिति माण्डूकीशिक्षायां नोक्तं परन्तु वर्णपटले तत् सम्यक् प्रतिपादितम्। उच्यते च तत्र – अतः स्थानानि वर्णानां कण्ठोऽवर्णहकारयोः इति।( व. प. 1/18)

पाणिनीयव्याकरणे अजिति नाम्ना व्यवह्रीयमाणः स्वरशब्दः वर्णानां वाचकः। अचः विहाय स्वरशब्देन उदात्तादिवर्णविशेषधर्मास्तथा षड्जादयोऽपि बुध्यन्ते। परमेश्वरस्य निश्वासभूतस्य वेदराशेः याज्ञवल्क्यादिभिः प्राचीनैः आचार्यैः स्वशिष्येभ्यः शाकल-वास्कल-काण्व-तैत्तिरीयादीनां संहितानां यथा प्रवचनं कृतम् स वेदराशिः अद्यापि तपोनिष्ठानां वैदिकानां कण्ठे श्रुतिपरम्परया अविकृतरूपेण विराराज्यते। तथैव श्रुतिपरम्परया अध्यापनमद्यापि नैष्ठिकाचार्यैः क्रियते। तच्च अपरिवर्तितरूपेण विद्यमानं उदात्तादिस्वरशास्त्रेनैव सम्भवति। अतः उदात्तादिस्वराणां तथा षड्जादीनां विशदालोचनं शिक्षाग्रन्थेषु तथा प्रातिशाख्येषु उपलभ्यते। माण्डूकीशिक्षापि नास्य व्यत्ययः। माण्डूकीशिक्षायां स्वरालोचनावसरे अपरैः शिक्षाग्रन्थैः क्वचित् सादृश्यं क्वचित् वैसादृश्यं कुत्रचिच्च अभिनवत्वं दृश्यते।

माण्डूकीशिक्षायाम् उदात्तानुदात्तस्वरितप्रचयः इति चत्वारः स्वराः स्वीकृताः। पाणिनीयव्याकरणे **उच्चैस्तरां वा वषट्कारः**[224] इति सूत्रेण यः उदात्ततरः, **उदात्तस्वरितपरस्य सन्नतरः** [225] इति सूत्रेण यः अनुदात्ततरः, महाभाष्यकृता स्वरिते विशिष्टः उदात्तः इति यः स्वरः स्वीकृतः स तु माण्डूकीशिक्षायां न गृहीतः। माण्डूकीशिक्षायां स्पष्टमेवोद्घोषितम् – **उच्चादुच्चतरन्नास्ति नीचान्नीचतरं कुतः**[226] इति। अतः पाणिनीयव्याकरणानुमतः स्वरः सप्तविधः उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः, स्वरिते विशिष्टः उदात्तः, एकश्रुतिश्च। पाणिनिसम्प्रदायेन सह माण्डूकीशिक्षायाः अपरमेकं वैसादृश्यमपि परिलक्ष्यते। पाणिनीयव्याकरणानुसारम् उदात्तानुदात्तयोः एकादेशः सर्वदा उदात्त एव स्यात् **एकादेश**

---

224 अष्टाध्यायी 1/2/34

225 अष्टाध्यायी 1/2/40

226 माण्डूकीशिक्षा 5/2

**उदात्तेनोदात्तः**[227] इति सूत्रानुसारेण, परन्तु माण्डूकीशिक्षायामुच्यते यत् उदात्तानुदात्तयोः एकादेश अनुदात्तो भवति। तत्रोच्यते-

**द्वयोस्तु स्वरयोः सन्धावेकीभावो यदा भवेत्।**

**उदात्तोऽथानुदात्तस्य वंशं गच्छति सन्धिषु॥**[228] इति।

उदात्तः अनुदात्तस्य वंशं गच्छति नाम तयोरेकादेशः अनुदात्तो भवति। माण्डूकीशिक्षायाः एतन्मतानुसारम् अथर्ववेदस्य शाखाविशेषे सम्प्रदायविशेषे वा नियमस्यास्य प्रयोगः आसीदिति वक्तुं शक्यते।

अथर्ववेदप्रातिशाख्यं तु माण्डूकीशिक्षानुमतं मतमिदं न पोषयति। अथर्ववेदप्रतिशाख्यानुसारम् उदात्तानुदात्तयोरेकादेशः उदात्त एव। तत्र सूत्रं सूत्रितम् – **अवर्णमध्ये आकार एकादेशे विशेषः** [229]इति। अथर्ववेदीयां चतुरध्यायिकायामपि उच्यते – **एकादेश उदात्तेनोदात्तः**[230] इति। किञ्च अथर्ववेदसंहितायां बहुत्रैव उदात्तानुदात्तयोः एकादेश उदात्त एव दृश्यते।

स्वरितस्वरभेदालोचनायां मण्डूकाचार्येण **सप्त स्वरान् प्रवक्ष्यामि...** इत्यादिश्लोकेन अभिनिहितः, प्राक्श्लिष्टः, जात्यः, क्षैप्रः, पादवृत्तः, तैरोव्यञ्जनः, तिरोविरामः इति स्वरितस्वरस्य सप्त भेदाः प्रतिज्ञाताः। तत्र तु ताथाभाव्यस्वरितस्य ग्रहनं नास्ति। पुनः स्वरितस्वराणां तीक्ष्णतालोचनायामपि ताथाभाव्यस्य उल्लेखः न प्राप्यते। ताथाभाव्यस्वरितः कस्मात् मृदुतरः कस्माच्च तीक्ष्णतरः इति तत्र नोपदिष्टः। परन्तु तेन अभिनिहितादिस्वरितालोचनावसरे

---

[227] अष्टाध्यायी 8/2/5

[228] माण्डूकीशिक्षा 6/2

[229] अथर्ववेदप्रातिशाख्यम् 1/1/6

[230] चतुरध्यायिका 3/3/22

सप्तलक्षणनप्रदानादनन्तरं ताथाभाव्यलक्षणं तदुदाहरणञ्च प्रदत्तम्। अतः माण्डूकीशिक्षायां स्वरितभेदालोचनायां प्रतिज्ञया सह विषयस्य वैसादृश्यं दृश्यते।

माण्डूकीशिक्षायां षड्जादिस्वराणाम् उदात्तादिष्वन्तर्भावकाले अभिनवत्वं दृश्यते। तत्रोच्यते –

**सप्तस्वरास्तु गीयन्ते सामभिः सामगैर्बुधैः।**

**चत्वार एव छन्दोभ्यस्त्रयस्तत्र विवर्जिताः॥**[231] इति।

अर्थात् मण्डूकाचार्यस्य मतानुसारं सामगैः ये षड्जादिसप्तस्वराः गीयन्ते तेषु चतुर्णाम् ऋगादिवेदान्तर्गते उदात्तादिस्वरे अन्तर्भावोऽस्ति। त्रयश्च विवर्जिताः नाम त्रयाणाम् उदात्तादिष्वन्तर्भावो न दृश्यते। मण्डूकाचार्येण –

**षड्ज-ऋषभ-गान्धारो मध्यमः पञ्चमस्तथा ।**

**धैवतश्च निषादश्च स्वराः सप्तेह सामसु॥**[232]

इति श्लोके सप्तानां स्वराणामुल्लेखः प्रदत्तः। एषु केषामुदात्तादिष्वन्तर्भावोऽस्ति केषाञ्च नास्ति तत्तु परमुल्लिखितम्।

**प्रथमावन्तिमौ च वर्तन्ते छन्दसि स्वराः।**

**त्रयो मध्या निवर्तन्ते मण्डूकस्य मतं यथा॥**[233] इति।

---

231 माण्डूकीशिक्षा 1/7

232 माण्डूकीशिक्षा 1/8

233 माण्डूकीशिक्षा 2/3

प्रथमौ नाम षड्ज-ऋषभौ अन्तिमौ नाम धैवतनिषादौ। एतेषां चतुर्णां उदात्तादिषु अन्तर्भावो विद्यते मध्यगतानां गान्धारमध्यमपञ्चमानामुदात्तादिषु अन्तर्भावो न विद्यते इति मण्डूकसिद्धान्तः।

माण्डूकीशिक्षायामुदात्तादिषु षड्जादीनां योऽन्तर्भावः प्रदर्शितः तत्रापि शिक्षान्तरैः सह वैसादृश्यं दृश्यते। माण्डूकीशिक्षानुसारं षड्जस्यानुदात्ते, ऋषभस्य स्वरिते, धैवतस्य प्रचये, निषादस्य उदात्ते अन्तर्भावः प्रदर्शितः। परन्तु पाणिनीयशिक्षायां तथा नोपलभ्यते। तत्र तु षड्जस्य स्वरिते धैवतस्यानुदात्ते च अन्तर्भावः प्रदर्शितः –

**उदात्ते निषादगान्धारावानुदात्ते ऋषभधैवतौ।**

**स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः॥**[234] इति।

एवं प्रकारेण माण्डूकीशिक्षायां वर्णस्वरौ प्रतिपादितौ। वर्णविषये तथा स्वरविषये अत्र शिक्षान्तरैः तथा प्रातिशाख्यैः सह बहुत्र सादृश्यं क्वचिच्च वैसादृश्यं तथाभिनवत्वं परिलक्ष्यते।

भगवता पतञ्जलिना स्वविरचितस्य महाभाष्यग्रन्थस्य पस्पशाह्निके उच्यते – **पुराकल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणाः व्याकरणं स्माधीयते। तेभ्यस्तत्तत्स्थानकरणानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते। तदद्यत्वे न तथा।** इति। व्याकरणमत्र उपलक्षणम्। पुरा सर्वे वेदस्याध्येतारः न केवलं व्याकरणमपि तु शिक्षाशास्त्रं तथा सर्वं वेदाङ्गशास्त्रं अधीयन्ते स्म। वर्णानां स्थानकरणानुप्रदानादीन् ज्ञात्वा ते वेदमपठन्। परन्तु अद्यत्वे तथा न भवति। तस्मात् शिक्षाशास्त्राध्ययनाभावात् अधुना यथार्थं वर्णोच्चारणं न दृश्यते। अंशः इत्यस्योच्चारणं कुत्रचित् अन्सः कुत्रचिच्च अम्सः एवं श्रूयते। उच्चारणदोषात् प्रायशः अकारान्तस्य शब्दस्य अकारः लुप्यमानः श्रूयते। यथा राम इत्यस्य स्थाने राम् इति जनता इत्यस्य स्थाने जन्ता इति

[234] पाणिनीयशिक्षा 12

। संयुक्तवर्णज्ञानाभावात् च ज्ञ इत्यस्य ग्यँ एतादृशं विकृतमुच्चारणं श्रूयते लोके। उच्चारणस्थानज्ञानाभावात् त्रिविधस्य शषसकारस्य स्पष्टं पृथगुच्चारणं लोके न श्रूयते। एतानि विहायापि बहव उच्चारणदोषाः लोके श्रूयते। अतो समाजे यथार्थतया वाग्व्यवहारार्थं वेदस्य रक्षणार्थं च शिक्षाशास्त्रमवश्यमध्येयमिति शिवम्।।

## सहायकाः ग्रन्थाः


- *अथर्ववेदः* (शौनकीयः) (१मो भागः). सम्पा. विश्ववन्धुः. होसिआरपुरम् : विश्वेश्वरानन्द-वैदिकशोधसंस्थानम्,२०१७ वि.
- *अथर्ववेदः* (शौनकीयः) (२यो भागः). सम्पा. विश्ववन्धुः. होसिआरपुरम् : विश्वेश्वरानन्द-वैदिकशोधसंस्थानम्,२०१८ वि.
- *अथर्ववेदप्रातिशाख्यम् अथवा अथर्ववेदीया चतुरध्यायिका*. सम्पा. डा. जमुनापाठकः. वाराणसी : चौखाम्बा विद्याभवन, २०१५
- *ऋग्वेदः*(१मो भागः). सम्पा. विश्ववन्धुः. होसिआरपुरम् : विश्वेश्वरानन्द-वैदिकशोधसंस्थानम्, २०२१ वि.
- *तैत्तिरीयोपनिषद्*. सम्पा. पण्डित-दुर्गाचरणसांख्यवेदान्ततीर्थः. कलकाता : देव साहित्य कुटिर प्राइभेट् लिमिटेड्, २००८.
- *दशपाद्युणादिवृत्तिः*. सम्पा. पण्डितश्रीयुधिष्ठिरमीमांसकः. वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९९७ (२यो प्र.) (१मः प्र. १९४३).
- दीक्षितः, भट्टोजी. *वैयाकरणसिद्धान्तकौमुदी* (१मो भागः). सम्पा. गिरिधरशर्मा परमेश्वरानन्दशर्मा च. दिल्ली : मोतिलाल बनारसीदास, २०१४( १२तमः प्र.) (१मः प्र. १९६१).
- दीक्षितः, भट्टोजी. *वैयाकरणसिद्धान्तकौमुदी* (४र्थो भागः). सम्पा. गिरिधरशर्मा परमेश्वरानन्दशर्मा च. दिल्ली : मोतिलाल बनारसीदास, २०११(षष्ठः प्र.) (१मः प्र. १९६१).
- *पाणिनीयशिक्षा*. सम्पा. बालकृष्णशर्मा सन्तोषः पण्ड्या च. उज्जयिनी : कालिदास-अकादेमी, २०५० वि.
- *माण्डूकीशिक्षा*. सम्पा. भगवद्दत्तः. नइ दिल्ली : मेहरचन्द लथमनदास पव्लिकेशन्स, २००९(परिवर्तितप्रकाशः) (१मो प्र.१९२१).
- मेदिनिकरः. *मेदिनिकोशः*. सम्पा.जगन्नाथशास्त्री होशिङ्गः साहित्याचार्यः. वाराणसी : चौखाम्बा संस्कृत सिरिज आफिस,१९६८.

- वसुः, योगिराजः. *वेदेर परिचय*. कलकाता : फार्मा के एल प्राइभेट लिमिटेड, २०१४.
- *शिक्षासंग्रहः*. सम्पा. आचार्य श्री रामप्रसादत्रिपाठि. वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः,१९८१.
- शौनक. *ऋग्वेदप्रातिशाख्यम्*. सम्पा. अमरकुमारचट्टोपाध्याय. कलकाता : संस्कृत पुस्तक भाण्डार,२०१६.
- याज्ञवल्क्यः. *याज्ञवल्क्यशिक्षा*. सम्पा. उदयनाथ झा. वाराणसी : चौखाम्बा ओरियेन्टालिया, १९८९.
- *Atharva Prātiśākhya*. Ed. Surya Kanta with intro. and Eng. Trans. Mehar Chand Lachhman Das Oriental and Foreign Booksellers and Publishers. Lahore.1939.
- *Nāradiyā Śikşā.* Ed. Usha R. Bhise. With commnt. Of Bhatta Sobhakara. Poona.1986.
- *The Pariśişṭas of the Atharvaveda*. Ed. George Melville Bolling and Julius Von Negelein. Otto Harrassowitz. Leipzig 1910.
- Varma Siddheshwar. *CRITICAL STUDIES IN THE PHONETIC OBSERVATION OF INDIAN GRAMMARIANS.* Munshi Ram Manohar Lal Oriental Publishers and Booksellers. Delhi.1961.